# शिक्षाधारा

# SHIKSHADHARA

(Annual Magazine of Department of Shiksha Shastri)


अधीक्षकः

प्रो. ए.पि. सच्चिदानन्दः

प्राचार्यः

प्रधानसम्पादकः

डा. चन्द्रकान्तः

विभागाध्यक्षः





सम्पादकः

डा. गणेश ति. पण्डितः

सहायकाचार्यः



राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'अ' श्रेण्या प्रत्यायितम्

राजीवगान्धीपरिसरः शृङ्गेरी – 577 139

2019-20

# शिक्षाधारा

# SHIKSHADHARA

(Annual Magazine of Department of Shiksha Shastri)


अधीक्षकः

प्रो. ए.पि. सच्चिदानन्दः

प्राचार्यः

प्रधानसम्पादकः

डा. चन्द्रकान्तः

विभागाध्यक्षः

सम्पादकः

डा. गणेश ति. पण्डितः

सहायकाचार्यः

सम्पादकसमितिः

डा. गौराङ्गबाघः , आचार्यः

डा. रामचन्द्रुल बालाजि , सहाचार्यः

डा. नारायणवैद्यः , सहायकाचार्यः

डा. अरविन्दकुमारसोमदत्तः, सहायकाचार्यः

डा. दयानिधि शर्मा , सहायकाचार्यः



राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'अ' श्रेण्या प्रत्यायितम्

राजीवगान्धीपरिसरः शृङ्गेरी - 577 139

2019-20

Name of the Magazine : SHIKSHADHARA

Department of Shikshashastra
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Menase, SRINGERI
Chikkamagalur Karnataka - 577139

Year of Publication : 2020
No. of Copies : 125

Published by : Department of Shikshashastra
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Mense, SRINGERI
Chikkamagalur Karnataka - 577139

Designed by : Sri K V Shashidhar
Rajiv Gandhi Campus, Sringeri

Printed At : Sri Maruthi Printers, Bangalore

*All rights are reserved for the Department and Writers are responsible for their respective articles.

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# शुभाशंसनम्

## जनयतु हर्षं शिक्षाधारा

राष्ट्रियसंस्कृतसंस्थानस्य 'योऽनूचानः स नो महान्' इति ध्येयवाक्यम् । तदनुसृत्य राष्ट्रियसंस्कृतसंस्थानेन प्राचीनशिक्षातत्त्वानां पुनरध्ययनाय प्रचाराय च शिक्षाशास्त्रस्य पाठ्यक्रमः समारब्धः । 'फलानुमेयाः प्रारम्भाः' इति न्यायानुसारं राष्ट्रियसंस्कृतसंस्थानं समस्तविश्वे संस्कृतशिक्षां विस्तारयामास । तथैव साम्प्रतमपि राष्ट्रियसंस्कृतसंस्थानस्य विविधेषु परिसरेषु शिक्षाशास्त्रपाठ्यक्रमः सञ्चाल्यते । तेषु राजीवगान्धीपरिसरः अपि अन्यतमः । अत्र महत्या श्रद्धया शिक्षाशास्त्रविषयपाठनेन सह पाठ्येतरकार्याण्यपि प्रवर्तन्ते । तत्र शिक्षाशास्त्रविभागीयैः प्राध्यापकैः छात्रैश्च मिलित्वा बहुभाषाभूयिष्ठेयं शिक्षाधारानाम्नी शिक्षाशास्त्रविभागीया वार्षिकी पत्रिका मनोज्ञया शैल्या सम्पादिता अस्तीति विज्ञाय मोमुदीति नश्चेतः ।

एतस्मिन् पत्रिकासम्पादनकर्मणि सततं परिश्रमं कृतवते डा. गणेश ति. पण्डितः इत्येतस्मै , मार्गदर्शनं दत्तवद्भ्यो शिक्षाशास्त्रविभागाध्यक्षेभ्यः डा. चन्द्रकान्तवर्येभ्यः , सहकृतवद्भ्यो विभागीयप्राध्यापकेभ्यः , छात्रेभ्यश्च मङ्गलं कामये ।

सर्वान्ते सन्दर्भेऽस्मिन् शरदिन्दुसन्निभायाः शारदाम्बायाः , सुधांशुकलितोत्तमाङ्गस्य चन्द्रमौलीश्वरस्य , श्रीमज्जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारतीमहास्वामिनाञ्च चरणकमलेषु प्रणतिततीः समर्पयामि ।

विकारिफाल्गुणचतुर्दशी शुक्रवासरः
२० – ०३ – २०२०

विद्वज्जनविधेयः

ए.पी.सच्चिदानन्दः

प्रो. ए. पि. सच्चिदानन्दः
प्राचार्यः

# नित्यं विलसतु शिक्षाधारा



आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् ।
विद्या सन्धिः । प्रवचनं सन्धानम् ।

– तैत्तिरीयोपनिषत् १ – ३

एवं प्रकारेण तैत्तिरीयोपनिषदि शिक्षायाः त्रिमुखी प्रक्रिया स्पष्टा वर्तते । अनया प्रक्रियया ज्ञानं सम्पादयति अन्तेवासी । अत्र ज्ञानप्राप्तिरेव मानवस्य प्रधानं कर्तव्यम् । ज्ञानसम्पादनार्थं मुख्यं साधनं भवति शिक्षणम् । आचार्यस्य अनुग्रहेणैव शिष्यः ज्ञानार्जनं करोति । गुरुशिष्यौ प्रधानौ भवतः । एतयोः संयोगादेव शिक्षाप्रक्रिया साफल्यं भजते ।

अस्यां दिशि शिक्षाविभागेन ज्ञानसम्पादकात्मकानि कर्माणि प्रतिवर्षमपि सम्पाद्यमानानि वर्तन्ते । तदनु अस्मिन् अपि वर्षे नैकविधानां शैक्षिककार्यक्रमाणां सञ्चालनेन सह शिक्षाधारानाम्नी शैक्षिकपत्रिका अपि प्रकाश्यं नीयत इति प्रमोदस्य विषयः वरीवर्ति । पत्रिकाया अस्याः सम्पादने नितरां यत्नशीलान् प्राध्यापकान् छात्रांश्च अभिनन्द्य एतदर्थं प्रेरणाशक्तिरूपेण विराजमानान् प्रणिपत्य शिक्षाधारायाः नैरन्तर्यार्थं जगद्गुरून् शारदाम्बाञ्च साष्टाङ्गं प्रणिपत्य छात्राणां समेषां मङ्गलमाशासे । पत्रिकायाः अस्याः सम्पादकेभ्यः कार्तज्ञ्यकुसुमानि समर्प्यन्ते ।

विकारिफाल्गुणद्वादशी गुरुवासरः
१९ – ०३ – २०२०

इत्थम्
डा. चन्द्रकान्तः
विभागाध्यक्षः , शिक्षाविभागः

# सम्पादकीयम्

अथाद्य विश्वमिदं विषमपरिस्थितौ वर्तते इति विदितमेव सर्वैरपि आबालवृद्धैः । लोकोऽयं किङ्कर्तव्यविमूढ इव स्तब्धोऽस्ति ' कोरोना ' कारणात् । प्रत्येकमपि शताब्देः आद्ये अन्तिमे च भागे एतादृश्यः विषमपरिस्थितयः रोगाः वा समागताः आसन् सन्ति भविष्यन्ति च । तत्रापि कलियुगे वर्तामहे वयम् । अतः कृष्णद्वैपायनमहर्षिणां वचनं सदैव स्मर्तव्यमेव । यथोक्तं तैः –

**" अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः ।**
**श्वः श्वः पापीयदिवसाः पृथिवी गतयौवना ॥"**

पुण्यभूमिरियं क्षीयमाणा वर्तत इति तु सत्यमेव । परन्तु अस्मिन् सन्दर्भे न केनापि निष्क्रियेण भाव्यम् । तत्रापि शिक्षणाधिगमप्रक्रियया सम्बद्धैः अस्माभिः तन्नाम गुरुशिष्यैः पर्यायमार्गः आश्रयणीय एव । शिक्षणप्रविधयः विषमप्रिस्थितौ अस्यां नैव उपकुर्वन्ति चेत्तर्हि अनुदेशनप्रविधयः वा आश्रयणीया एव । एवं परोक्षमार्गमवलम्ब्य शिक्षणाधिगमप्रक्रिया सञ्चालनीया । एवं करणेन छात्रा अपि सक्रियाः सन्तः लक्ष्यैकचित्ताः भविष्यन्ति । अनेन परोक्षमार्गावलम्बनेन नाधिकः परिणामः भविष्यति इति निराशभावः न वोढव्यः । यथोक्तम् –

**" उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः**
**दैवेन देयमिति का पुरुषा वदन्ति ।**
**दैवं निहत्य कुरु पौरुषमात्मशक्त्या**
**यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ॥"**

सुभाषितमिदं मनसि निधाय कर्मणि प्रवर्तामहे वयम् । अनौपचारिकशिक्षणाभिकरणानां माध्यमेन वा यथाशक्ति अस्माभिः कार्यं सम्पादनीयमापतितमधुना । अतः आशान्विताः सन्तः शैक्षिकव्यापारेषु मतिं निक्षिपामः ।

तत्र हि “ **शिक्षाधारा** ” इत्याख्या शिक्षाविभागीया वार्षिकी पत्रिका प्रतिवर्षमिव अस्मिन्नपि वर्षे विभागेन प्रकाशयिष्यते । अस्यां पत्रिकायां विभागीयानाम् अध्यापकानां छात्राध्यापकानां च विशिष्टाः लेखाः वर्तन्ते । एतस्याः पत्रिकायाः प्रकाशने ये प्रत्यक्षरूपेण परोक्षरूपेण च सहकृतवन्तः तान् सर्वान् हृदयेन स्मरामः । पत्रिकाप्रकाशनसमितेः सदस्यानां समेषाम् अनुपमयोगदानेन एव शिक्षाधारायाः लोकार्पणं भविष्यति इति परिभाव्य तान् अपि सस्नेहं स्मरामः । विशिष्य उभयेषां जगद्गुरूणां जगदम्बायाश्च अनुग्रहविशेषैरेव कार्यमिदं सम्पद्यते इति शिवम् ।

इत्थं विद्वद्विधेयः

डा. गणेश ति. पण्डितः

दिनाङ्कः :– १९ – ०३ – २०२०

स्थानम् :– शृङ्गेरी

# शिक्षाविभागः



Dr. Chandrakant
Head of the Department



Prof. Gouranga Bagh
Professor



Dr. Ramachandrula Balaji
Asso. Professor



Dr. Ganesh T. Pandit
Asst. Professor



Dr. Narayana Vaidya
Asst. Professor



Dr. Aravinda K Somadutt
Asst. Professor



Dr. Dayanidhi Sharma
Asst. Professor

# EDITORIAL BOARD



Prof. A.P. Sachidananda
Principal



Dr. Chandrakant
Chief Editor



Dr. Ganesh T. Pandit
Editor

## PUPIL TEACHERS' EDITORIAL BOARD



उमाकान्तजोशी
शिक्षाशास्त्रिद्वितीयवर्षम्



मधुस्मिता राउत
शिक्षाशास्त्रिद्वितीयवर्षम्



गिरीशभट्टः
शिक्षाशास्त्रिप्रथमवर्षम्



छाया गडदे
शिक्षाशास्त्रिप्रथमवर्षम्

# कार्यालयीयसदस्याः



श्री गुरुराजभट्टः
कार्यालयसहायकः



श्री एस्. आर्. चन्द्रशेखरः
वरिष्ठश्रेणी लिपिकः



श्रीमती मञ्जुळा एस्.
कनिष्ठश्रेणी लिपिका



श्री एच्. के. कुमारः
एम्. टि. एस्.



श्री एस्. शिवण्णा
एम्. टि. एस्.



श्रीमती सौम्या बि. टि.
डि. ई. ओ. (औ.सो.)



श्रीमती सावित्री टि. एस्.
छात्रावासनिरीक्षिका



श्रीमती हेमलता
छात्रावासनिरीक्षिका



श्री आकाश बाबु जैन्
सहायकग्रन्थपालकः



श्री दिनेशः एस्.
एम्. टि. एस्.



श्रीमती सिद्दम्मा
एम्. टि. एस्.



श्री मोहम्मद् रफ़ीक्
एम्. टि. एस्.



श्रीमती शारदा एस्. आर्.
डी. ई. ओ. (औ. सो.)



श्रीमती शुभा
एम्. टि. एस्. (औ. सो.)



श्री लोकेशः
छात्रावाससहायकः (औ. सो.)



श्री नागेशः एन्.
उद्यानपालकः

# कार्यालयीयसदस्याः



श्री उमेशः एच्. एस्.
स्वच्छताकर्मचारी (औ.सो.)



श्रीमती जयम्मा
स्वच्छताकर्मचारिणी



श्रीमती तिम्मम्मा
स्वच्छताकर्मचारिणी (औ.सो.)



श्रीमती सुन्दरी
स्वच्छताकर्मचारिणी (औ.सो.)



श्रीमती पार्वती
स्वच्छताकर्मचारिणी (औ.सो.)



श्रीमती पद्मा
स्वच्छताकर्मचारिणी (औ.सो.)



श्रीमती अन्नपूर्णा
स्वच्छताकर्मचारिणी (औ.सो.)



श्री एम्. बि. शङ्करः
रक्षणकर्मचारी (औ.सो.)



श्री सदाशिवशेट्टि
रक्षणकर्मचारी (औ.सो.)



श्री के. एस्. चन्द्रप्पः
रक्षणकर्मचारी (औ.सो.)



श्री एम्. के. राजुः
रक्षणकर्मचारी (औ.सो.)



श्री रवि एम्. एस्.
रक्षणकर्मचारी (औ.सो.)



श्री एम्. वि. महेशः
रक्षणकर्मचारी (औ.सो.)



श्री एम्. जि. अप्पय्याचार्
रक्षणकर्मचारी (औ.सो.)



श्री सुब्रह्मण्यः एम्. बि.
रक्षणकर्मचारी (औ.सो.)



श्री सुब्रह्मण्यः
रक्षणकर्मचारी (औ.सो.)

# सहकारः

शिक्षाशास्त्रिकक्ष्यायाः नैके छात्राः पत्रिकायाः सुचारुसम्पादनकर्मणि स्वीयं योगदानं विभिन्नरूपेण प्रायच्छन् । तेषां विवरणम् इत्थं वर्तते –

## प्रथमवर्षीयाः

| Responsibilities | Name of the Student |
|---|---|
| Proof Correction of all Sanskrit Articles | Keerthi Nagaraja Hegade |
| | Shweta G. S. |
| | Rajesh R. S. |
| Proof Correction of all Hindi Articles | Mukul Sharma |
| | Amit Kumar |
| | Chaya Gadade |
| Proof Correction of all English Articles | Vivek Udupa K. |
| Proof Correction of all Kannada Articles | Narasmiha Saraswati Shastri |
| Typing | Rameshwar Prasad |
| | Girish Bhat |
| Collecting the Articles from Students and Distributing the same Proof Readers | Girish Bhat |
| | Chaya Gadade |
| Pages Designing | Girish Bhat |

## द्वितीयवर्षीयाः

| Responsibilities | Name of the Student |
|---|---|
| Proof Correction of all Sanskrit Articles | Durgaprasad Bhattarai |
| | Kartik Mishra |
| Proof Correction of all Hindi Articles | Ashok Dangwal |
| | Vinay Kumar Shukla |
| Proof Correction of all English Articles | T. K. Kaushik Rao |
| Proof Correction of all Kannada Articles | Ramachandra Bhat |
| | Chinmay Bhat |
| Address and Photo Collection | Umakant Joshi |
| Collecting the Articles from Students and Distributing the same Proof Readers | Umakant Joshi |
| | Madhismita Rout |

# सत्रविवरणम्

## उद्घाटनम्

श्रीशारदाम्बायाः परिपूर्णकृपाकटाक्षैः श्री श्री भारतीतीर्थमहास्वामिनां श्री श्री विदुशेखरभारतीमहास्वामिनां च अनुग्रहविशेषैः अस्मत्कुलपतीनाम् आचार्याणां प्रो.परमेश्वरनारायणशास्त्रिवर्याणां शुभाशीर्भिः , शृङ्गगिरिक्षेत्रे विराजमानस्य राजीवगान्धीपरिसरस्य शिक्षाशास्त्रिविभागस्य २०१९ – २०२० शैक्षिकसत्रं ०८ – ०७ – २०२० तमे दिनाङ्के परिसरप्राचार्याः प्रो.सच्चिदानन्दउडुपवर्याः समुदघाटयन् । कार्यक्रमेऽस्मिन् शिक्षाशास्त्रिविभागस्य विभागाध्यक्षाः डा.चन्द्रकान्तभट्टमहोदयाः , प्राध्यापकाः डा.रामचन्द्रुलबालजीवर्याः , प्राध्यापकाः डा.हरिप्रसादमहोदयाः , कक्ष्याध्यापकाः प्राध्यापकाः डा. गणेश ति. पण्डितमहाभागाः , प्राध्यापकाः डा.वेङ्कटरमण एस्. महाभागाः , प्राध्यापकाः डा.नारायणवैद्यमहाभागाः , प्राध्यापकाः डा. अरविन्दकुमारसोमदत्तवर्याश्च समुपस्थिताः आसन् ।

## संस्कृतसम्भाषणवर्गः

शिक्षाशास्त्रिच्छात्राणां संस्कृतसम्भाषणक्षमतायाः वर्धनार्थं नवेम्बरमासस्य ११ तमदिनाङ्कादारभ्य नवेम्बरमासस्य २४ दिनाङ्कपर्यन्तं दशदिनानि संस्कृतसम्भाषणवर्गः समभवत् । श्री रविशङ्करवर्यः वर्गसञ्चालनम् अकरोत् । अस्य वर्गस्य समारोहकार्यक्रमः नवेम्बरमासस्य २४ दिनाङ्के अभवत् । अस्य समारोहस्य अध्यक्षाः डा. चन्द्रकान्तमहोदयाः आसन् ।

## शिक्षणाभ्यासः

शिक्षाशास्त्रिद्वितीयवर्षीयाणां छात्राध्यापकानां मासचतुष्टयात्मकः शिक्षणाभ्यासः संवत्सरेऽस्मिन् अगस्टमासस्य १६ दिनाङ्कतः डिसेम्बरमासस्य १३ दिनाङ्कं यावत् चक्रद्वये प्रावर्तत ।

## संस्कृतसप्ताहः

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय नवेम्बरमासस्य १८ दिनाङ्कतः नवेम्बरमासस्य २० दिनाङ्कपर्यन्तं संस्कृतसप्ताहः समाचरितः । अस्मिन् सप्ताहे चतस्रः स्पर्धाः आयोजिताः आसन् ।

**सांस्कृतिकस्पर्धाः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय जनवरिमासस्य २१ तः जनवरिमासस्य २७ पर्यन्तं सांस्कृतिकस्पर्धाः समभवन् । चतस्रः स्पर्धाः आयोजिताः अभूवन् । २१ दिनाङ्कस्य अपराह्णे रङ्गवल्लीनिर्माणस्पर्धा , २३ दिनाङ्कस्य अपराह्णे लघुरूपकस्पर्धा , २५ दिनाङ्कस्य अपराह्णे सामूहिकनृत्यस्पर्धा , २७ दिनाङ्कस्य प्रातः गीतगायनस्पर्धाश्च आयोजिताः अभूवन् ।

**विद्यालयावबोधः**

हायनेऽस्मिन् शृङ्गेरी , तोरेहड्लु , हरिहरपुरम् , कोप्पा इत्यत्र विद्यमानासु प्रौढशालासु डिसेम्बरमासस्य २ दिनाङ्कतः डिसेम्बरमासस्य १३ दिनाङ्कपर्यन्तं छात्राध्यापकानां विद्यालयावबोधः प्राचलत् । शिक्षाशास्त्रिप्रथमवर्षीयाः छात्राध्यापकाः अत्र भागम् अगृह्णन् ।

**प्रशिक्षणवर्गः**

हायनेऽस्मिन् जनवरिमासस्य ३ दिनाङ्कतः १२ दिनाङ्कपर्यन्तं संस्कृतसम्भाषणशिबिरसञ्चालनकौशलान्यवाप्तुं प्रशिक्षणवर्गः समजनि । अत्र सर्वेऽपि शिक्षाशास्त्रिच्छात्राध्यापकाः शिबिरसञ्चालनप्रशिक्षणं प्राप्तवन्तः ।

**क्रीडास्पर्धाः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय डिसेम्बरमासस्य १८ तः १९ पर्यन्तं विविधाः क्रिडास्पर्धाः समभवन् ।

**एकदिनात्मकराष्ट्रियसङ्गोष्ठी**

शिक्षाशास्त्रविभागस्य एकदिवसीया राष्ट्रियसङ्गोष्ठी मार्चमासस्य १२ , १३ दिनाङ्के समजनि । अस्यां सङ्गोष्ठ्यां शिक्षाशास्त्रिपाठ्यक्रमस्य अधिगममूल्याकलनम् इत्येतस्मिन् विषये बहवः पर्यभाषन्त ।

**सामान्यसङ्गणकज्ञानप्रशिक्षणवर्गः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन सामान्यसङ्गणकज्ञानप्रशिक्षणवर्गः जनवरिमासस्य २० दिनाङ्कतः २४ दिनाङ्कपर्यन्तं समभवत् । वर्गेऽस्मिन् सङ्गणकप्राध्यापकाः श्री शशिधर के. वि. महोदयाः सुचारु अबोधयन् ।

# विषयानुक्रमणिका

## संस्कृतधारा


| क्र.सं. | विषयः | नाम | पृ.सं |
|---|---|---|---|
| 1 | अपादानकारकम् | प्रो. गौराङ्गबाघः | 02 |
| 2 | अधिगमस्य आयामा: स्तराश्च | डा. रामचन्द्रुल बालाजि | 05 |
| 3 | जैनदर्शनानुसारं शान्तिशिक्षाया: अवधारणा | डा.नारायणवैद्यः | 09 |
| 4 | संस्कृतशिक्षणस्य सिद्धान्ताः | डा. दयानिधि शर्मा | 12 |
| 5 | साम्प्रतिकयुगे अर्थस्य महत्त्वम् | रीमा पधान | 15 |
| 6 | गीर्वाणगीते विश्वविद्यालयः | मञ्जुलता बेहेरा | 16 |
| 7 | विज्ञानं वरदानम् अभिशापो वा | शुश्रीसीमिता साहु | 17 |
| 8 | समाजे सांस्कृतिकपरिवर्तने संस्कृतज्ञानां भूमिका | कीर्ति नागराज हेगडे | 19 |
| 9 | भाषाशिक्षकः एव समाजस्य उत्तरदायी | श्वेता जि. एस्. | 20 |
| 10 | साहित्यम् | ज्योत्स्नाराणी जेन | 21 |
| 11 | अध्ययनम् | अनिता नायक | 22 |
| 12 | अधिगमप्रक्रिया | गणेश तिम्मण्ण भट्ट | 24 |
| 13 | जीवने शिक्षणम् | गिरीशभट्टः | 26 |
| 14 | मानवान्तर्गत-अचेतनाशक्तिः | श्रीशसमीरः के. एस् | 28 |
| 15 | महाभारतानुसारं शैक्षिक विचारा: | भुवनचन्द्र जोशी | 30 |
| 16 | मन्त्रलक्षणम् | प्रदीपभट्ट के. | 32 |
| 17 | अध्यापकोत्तम: | राजेश आर्. एस्. | 33 |
| 18 | बुद्धेः मापनं साधनानि | गुर्रं वेङ्कटशिवप्रसादः | 35 |
| 19 | पियाजे-महोदयस्य संज्ञानात्मकविकासः | हरिश चन्द्र दासः | 36 |
| 20 | समाजे विज्ञानं वरम् उत अभिशापः | दवे गौतमकुमारः | 40 |
| 21 | शिक्षायाः स्वरूपम् | कृपामयीविश्वालः | 44 |
| 22 | मनुष्यस्यावयवे ध्वजाद्यष्टौ आयप्रभेदाः | गुरुनारायण नरसिंह भट्ट | 47 |
| 23 | राष्ट्रियमानवाधिकारायोगः | मधुस्मिता राउत | 49 |
| 24 | पाठ्यचर्या | प्रियङ्का सेनापति | 50 |
| 25 | देशस्य छात्रेभ्यः राष्ट्रीयप्रतिवेदनम् | जयश्री बेहेरा | 52 |
| 26 | साक्षरतायाः महत्त्वम् | शुभश्री महाराणा | 53 |

| क्र.सं. | विषयः | नाम | पृ.सं |
|---|---|---|---|
| 27 | यावज्जीवेत्सुखंजीवेत् | मधुस्मितामिश्रः | 53 |
| 28 | काव्यप्रयोजनम् | सुमित्रा साहु | 54 |
| 29 | किं ज्ञानमेव अलम् ? | कार्तिक मिश्रा | 55 |
| 30 | मानवस्य श्रेष्ठधर्म: | करिस्मा बेहेरा | 56 |
| 31 | छात्राणामध्ययनं तपः | रञ्जुला पधान | 57 |
| 32 | छात्रः राजनीतिश्च | अशोकडंगवाल: | 59 |
| 33 | मे प्रियतमा | श्रीकान्तनायकः | 60 |
| 34 | सम्प्रेषणम् | संगीत सुना | 61 |
| 35 | मार्गदर्शकः | रवीश जोशी | 63 |
| 36 | व्याकरणशास्त्रस्य प्रयोजनम् | तृप्ती साहु | 64 |
| 37 | वचने का दरिद्रता | भवानी पात्र | 65 |
| 38 | आधुनिकेऽस्मिन्काले<br>केन्द्रीयविश्वविद्यालयमाध्यमेन संस्कृतस्य प्रचारः | पुपुनदासः | 66 |
| 39 | योगः | प्रकाश चन्द्र मेहेर | 68 |
| 40 | भारतीयशिक्षाव्यवस्था | बसन्त बाहाला | 69 |
| 41 | हितं मनोहारि च दुर्लभं वचः | द्वितीकृष्ण पाणीग्राही | 71 |
| 42 | भारतीयशिक्षादर्शनयोर्सम्बन्ध: | गुम्मडिमङ्गतायारु | 72 |
| 43 | रामायणम् | वेङ्कट्रमण गणपति हेब्बार | 73 |
| 44 | शिक्षाप्रशासनस्यार्थः परिभाषा च | शिवप्रसादकेशन् | 76 |
| 45 | राष्ट्रनिर्माणे शिक्षाशिक्षकयो: योगदानम् | माधव: | 77 |
| 46 | प्रकृति: | रश्मिता | 78 |


## हिन्दीधारा


| | | | |
|---|---|---|---|
| 47 | एक आदर्श शिक्षक की भूमिका | छाया गडदे | 81 |
| 48 | अपने आप पर विश्वास | जयन्त कुमार सरकार | 83 |
| 49 | NCERT का संपूर्ण परिचय | मुकुल राय | 84 |
| 50 | शिक्षा का महत्त्व | चन्दनबिशाल | 86 |
| 51 | शिक्षा की कमी क्यूँ है आज ? | झसकेतन साहा | 87 |
| 52 | अंतरराष्ट्रीय योग दिवस | सौम्यरञ्जन प्रधान | 89 |

| क्र.सं. | विषयः | नाम | पृ.सं |
|---|---|---|---|
| 53 | सूक्ष्म शिक्षण | शुभ राय | 90 |
| 54 | महावाक्यविवेक | अमित कुमार | 91 |
| 55 | शिक्षा के वैयक्तिक तथा सामाजिक उद्देश्य | वेदपाल साहू | 94 |
| 56 | आधुनिक शिक्षा प्रणाली | रामेश्वरप्रसाद | 96 |
| 57 | समाज के प्रति शिक्षा के कर्तव्य | मुकुल शर्मा | 98 |
| 58 | शिक्षा का हमारे जीवन में महत्व | प्रियाङ्का दाश | 99 |
| 59 | भारत में शिक्षा | सन्ध्याराणी पृष्टी | 100 |
| 60 | हिन्दी व्याकरण शिक्षण | विनय कुमार शुक्ल | 101 |
| 61 | शान्ति शब्द का महत्व | संजय सरकार | 105 |
| 62 | शिक्षणाभ्यास एक अलौकिक अनुभव | दुर्गाप्रसाद भट्टराई | 106 |
| 63 | भारत की शिक्षा व्यवस्था में समस्या | रामकृष्ण प्रधान | 108 |
| 64 | नैतिक मूल्यपरक शिक्षा | देवानन्द राणा | 109 |
| 65 | किसानजीवन | शिवाजी साहु | 110 |
| 66 | संस्कृति युक्त भारतवर्ष | उमाकान्त जोशी | 111 |
| 67 | शिक्षण के सूत्र | दीपक उनियाल | 112 |
| 68 | शिक्षित | रोजी बन्छोर | 114 |
| | **आङ्ग्लधारा** | | |
| 69 | Human Values and Education | Rojasmita Sethi | 117 |
| 70 | Sky | Puspanjali sahu | 118 |
| 71 | Education has Changed our Lifestyle | Barsharani Hota | 120 |
| 72 | Hard Work | Subhalaxmi Tiadi | 121 |
| 73 | Education | Bisnupriya Jena | 121 |
| 74 | The Parts of Speech | Sujata Behera | 122 |
| 75 | A Girl Child is God's Gift | Diptirekha Mishra | 123 |
| 76 | Introduction of Four-year B.Ed Course | Saumya Dwivedi | 124 |
| 77 | Importance of Education | Subhasmita Paramguru | 125 |
| 78 | The Real Education | Praveen Gautam | 126 |

| क्र.सं. | विषयः | नाम | पृ.सं |
|---|---|---|---|
| 79 | Educational Developments after Independence | T.K. Kaushik Rao | 127 |
| 80 | The Purpose of Education | Niharika Dash | 130 |
| 81 | Effects of television | Sabita Mandal | 131 |
| 82 | I made her 'Smile' | Kamala H. Nellur | 132 |
| 83 | Life is a Puzzle | Snigdharani Patra | 133 |
| 84 | Indian Education Vs Foreign Education | Minsu Bagarti | 134 |
| 85 | Learning Skills | Vinayak Sabhahit | 136 |
| 86 | Modernization Ill | Sushanta Suna | 138 |
| 87 | Learn | Sushanta Kumar Pradhan | 140 |
| 88 | Friendship | Pankajini Mohanty | 140 |
| | **कन्नडधारा** | | |
| 89 | ಗುರುಕುಲ ಪದ್ಧತಿ | ಪ್ರಶಾಂತ ರಾ. ಗಾಂವ್ಕರ | 143 |
| 90 | ತಾತತಥ್ಯ | ಸಮರ್ಥ ಬಿ. ಎಮ್. | 146 |
| 91 | ರಾಷ್ಟ್ರೀಯತೆ ಮತ್ತು ಧರ್ಮ | ವಿವೇಕ ಉಡುಪ ಕೆ. | 147 |
| 92 | ಶಿಕ್ಷಕನೂ ನಾಯಕನೇ | ಪ್ರಸನ್ನ ಪ್ರಕಾಶ ಹೆಗಡೆ | 147 |
| 93 | ನನಸಾಗದಿದ್ದರೂ ಕನಸಿಗಿದೆ ಘನತೆ | ಕಾವ್ಯ ಬಿ. ಎಮ್. | 148 |
| 94 | ವಿದ್ಯಾಭ್ಯಾಸದ ಗುರಿ | ಗೋಪಿಕಾ ಎಸ್. ಕೆ. | 150 |
| 95 | ಆರೋಗ್ಯ ಮತ್ತು ಸಮಾಜ | ಅಂಕುಶ ವಿ. ಹೆಗಡೆ | 152 |
| 96 | ಇಂದಿನ ಶೈಕ್ಷಣಿಕ ಪದ್ಧತಿ | ರಾಮಚಂದ್ರ ಭಟ್ಟ | 153 |
| 97 | ಸುಪ್ತಸಂಜೀವಿನಿ ಕುಂಡಲಿನಿ | ಚಿನ್ಮಯ ಭಟ್. | 154 |
| 98 | चित्रधारा | | 156 |
| 99 | शिक्षाशास्त्री द्वितीयवर्षीयच्छात्राणां नामावलिः | | 160 |

# संस्कृतधारा

# अपादानकारकम्

प्रो. गौराङ्गबाघः
आचार्यः
शिक्षाविभागः

काव्यस्वरूपस्य निरूपणसन्दर्भे विश्वनाथकविराजः स्व प्रणितकाव्यस्वरूपे "वाक्यं रसात्मकं काव्यमिति" उक्तवान् अस्ति । वस्तुतः इदं वाक्यं कथं जायते चेत् - क्रमशः वर्णानां समूहः पदम् । पदसमूहः वाक्यम् । वाक्यम् अभीप्सितमर्थं बोधयति। यतो हि शब्दप्रपञ्चे वाक्यमेव प्राधान्यम् आवहति । किन्तु पदेन विना वाक्यं न संभवति । विना वर्णेभ्यः पदं न भवति । अतः व्याकरणे वर्णनिमित्तानि कार्याणि पदनिमित्तानि कार्याणि च सन्ति । प्रायः सन्धिकार्याणि वर्णनिमित्तानि। समासादीनि पदनिमित्तकानि । वाक्यम् अवलम्ब्य प्रवृत्तानि भवन्ति कारकाणि कारकसम्बन्धीनि कार्याणि च । साक्षात् परम्परया वा वाक्यानि संस्कर्तम् एव व्याकरणं प्रवृत्तम्। सम्प्रति कारकाणि कारकसम्बन्धीनि कार्याणि च इह प्रस्तूयन्ते।

**वाक्यम्**

किं नाम वाक्यम् ? कारकान्विता क्रिया वाक्यम् । यथा - हरिणः धावति,धेनुः तृणानि खादति, स आसन्दे उपविशति । एतेषु वाक्ये प्रथमे कर्तृकारकेण अन्विता धावनक्रिया । द्वितीये - कर्तृकारकेण कर्मकारकेण च अन्विता खादनक्रिया । तृतीये - कर्तृकारकेण अधिकरणकारकेण च अन्विता उपवेशनक्रिया ।

**कारकम्**

किं नाम कारकम् ? क्रियान्वयि कारकम् । क्रियायाः अन्वयः। अन्वयः= सम्बन्धः। क्रियान्वयः अस्यास्ति इति क्रियान्वयि । यः क्रियया अन्वेति ( सम्बन्धं प्राप्नोति ) सः कारकम् इत्युच्यते ।

**कर्ता कर्म च करणं सम्प्रदानं तथैव च ।**
**अपादानाधिकरणमित्याहु कारकाणि षट् ।।**

षट्कारकेषु प्रतिपाद्यं कारकमपादानम् ।

ध्रुवमपायेऽपादानम् अपाय:=विश्लेष:, ध्रुवम्=अवधिभूतम् , विश्लेषे साध्ये अवधिभूतं कारकम् अपादानं स्यादिति सूत्रार्थ:। विभागाश्रय: अपादानं भवतीति फलितार्थ: । यथा - पर्णं वृक्षात् पतति । पत् धातोरर्थ: अधोदेशसंयोगरूपं फलम्, तदनुकूलक्रिया च । पतनक्रियाश्रय: पर्णं कर्त्री। अवधिभूत: विभागाश्रय: वृक्ष: । अत: वृक्ष: अपादानम् । यत्र अपादानस्य प्रसक्तिः तत्र द्वयोः संयुक्तयोः विभागः भवेत् एव। यथात्र - संयुक्तयोः वृक्षपर्णयोः विभागः जातः अस्ति।

विभागः वृक्षे पर्णे च अस्ति, विभागस्य द्विनिष्ठत्वात्। अतः पर्णमपि विभागाश्रयरेव इत्यतः पर्णमपि कुतः अपादानं न भवति इति शङ्का जायते। तत्र इदं समाधानं पर्णं यथा विभागाश्रयः तथा पतनक्रियाश्रयः अपि। अतः विभागाश्रयत्वात् पर्णमपादानसंज्ञकं, पतनक्रियाश्रयत्वात् कर्तृसंज्ञकमपि। एकस्य एव द्वयोः प्रसक्तौ परसंज्ञा एव कर्तव्या। अष्टाध्यायामपादानसंज्ञायाः (२/४/२४) अपेक्षया कर्तृसंज्ञा (२/४/५४) एव परा। अतः पर्णस्य कर्तृसंज्ञा एव न तु अपादानसंज्ञा। अत्र प्रमाणं-विप्रतिषेधे परं कार्यम्। विभक्तीनां प्रवृत्तौ कारकं प्राधान्यं भवति - कारकसंज्ञां पुरस्कृत्य या विभक्तिः प्रवर्तते सा कारकविभक्तिः इत्युच्यते। कारकविभक्तयः पञ्च एव भवन्ति-

अपादानकारकस्य पञ्चमी-विभक्तिः भवति - तद् कारकपञ्चमी, उपपदपञ्चमी चेति पञ्चमी द्विधा। यत् अपादानं भवति तस्मात् अपादानात् पञ्चमी भवति। अपादाने पञ्चमीविधायकं सूत्रमेकमेव अपादाने पञ्चमी आदौ कारकपञ्चमी-

(१) **ध्रुवमपायेऽपादानम्** - (१/४/२४) विश्लेषे साध्ये अवधिभूतं कारकमपादानं स्यात्। विभागाश्रयोऽपादानामिति फलितार्थः। वृक्षात् पर्णं पतति। अत्र पत्धातोरर्थः अधोदेशसंयोगरुपं फलम्, तदनुकूलक्रिया च। पतनक्रियाश्रयः पर्णं कर्तृ विभागाश्रयो वृक्षः। अतः वृक्षः अपादानम्।

(२) **जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्** - जुगुप्सा-विराम-प्रमादार्थकधातुभिः योगे, जुगुप्साविषयस्य, विरामविषयस्य, प्रमादविषयस्य च अपादानसंज्ञा भवति।

(क) पापात् जुगुप्सते। अत्र जुगुप्सायाः विषयः पापम्। तस्य अपादानसंज्ञा प्रकृतवार्तिकेन। अपादानभूतात् पापात् पञ्चमी। पापविषये न रमते।

(ख) अधर्मात् विरमति। अत्र विरामस्य विषयः अधर्मः तस्य अपादानसंज्ञा भवति। अपादानभूतात् अधर्मात् अपादाने पञ्चमी इति सूत्रेण। अधर्मविषये न प्रवर्तते इत्यर्थः।

(ग) धर्मात् प्रमाद्यति । अत्र प्रमादस्य विषय: धर्म: । तस्य अपादानसंज्ञा । अपादानभूतात् धर्मात् पञ्चमी । धर्मविषये मुह्यतीत्यर्थ: ।

(३) **भीत्रार्थानां भयहेतु:- (२/४/२५)** भयार्थानां त्राणार्थानां च प्रयोगे भयहेतु: अपादानं स्यात् ।

(क) चौरात् बिभेति । अत्र भयहेतु: चोर: । अत: चोर: अपादानम् । चोरात् पञ्चमी । चोरेण हेतुना भीतिम् आप्नोति ।

(ख) व्याघ्रात् रक्षति । अत्र भयहेतु: व्याघ्र: । अत: व्याघ्र: अपादानम् । व्याघ्रात् पञ्चमी । व्याघ्रेण हेतुना तत्कृतवधनिवृत्त्यै आत्मानं रक्षतीत्यर्थ:।

(४) **आख्यातोपयोगे (१/४/२९)** - नियमपूर्वकविद्यास्वीकारे वक्ता अपादानं स्यात् । (वक्ता = अध्यापयिता)

(क) शिष्य: उपाध्यायात् अधीते । नियमपूर्वकविद्याया: स्वीकर्ता शिष्य:। अत: शिष्य: कर्ता । तस्य अध्यापयिता उपाध्याय: । अत: उपाध्याय: अपादानम् ।

**(५) जनिकर्तु: प्रकृति: (१/४/३०)** - जायामानस्य हेतु: अपादानं स्यात् ।

(क) तन्तुभ्य: पटो भवति । अत्र जायमान: पट:। तस्य हेतु: तन्तव: । अत: तन्तव: अपादानम् ।

उपपदपञ्चमी-

**अन्यारादितरर्तेदिकशब्दाञ्चूत्तरपदाजाहियुक्ते - (२/३/२९)**

अन्य,आरात्,इतर,ऋते,दिक्शब्द,अञ्चूत्तरपद,आच्, आहि इत्येतैर्योगे पञ्चमीविभक्तिः भवति।

(क) प्राध्यापकात् प्राचार्यः अन्यः।अर्थान्तरम् इति पञ्चसु वाक्येषु अन्यार्थकप्रयोगात् पञ्चमी श्रूयते।

(ख)ग्रामात् आरात् वनम् अस्ति।ग्रामात् दूरं समीपं वा वनमस्ति इत्यर्थः।

(ग) ज्ञानात् ऋते न मुक्तिः। ज्ञानेन विना मुक्तिः न सम्भवत्यर्थः। ऋते=विना

(घ) ग्रामात् उत्तरः विद्यालयः। ग्रामावधिकः उत्तरदिग्वर्ती विद्यालयः इत्यर्थः।

(ङ) वैशाखात् पूर्वः चैत्रः। वैशाखावधिकः पूर्वकालभवः चैत्रः। अवयववाचिनां पूर्वादीनां योगे पञ्चमी भवति।

**********

# अधिगमस्य आयामा: स्तराश्च

डा. रामचन्द्रुल बालाजि
सहाचार्यः
शिक्षाविभागः

**अधिगमस्य आयामा:**

परिशोधकै: सैद्धान्तिकैश्च अधिगमप्रक्रियाया: निर्वचनाय अधिगमदिशि प्रवर्त्तनाय च केचन आयामा: अङ्गीकृता: वर्तन्ते । अधिगमे साफल्यसम्पादनाय एते पञ्चायामा: अत्यन्तावश्यका: वर्तन्ते । अधिगमविषये केन्द्रीकृतचिन्तनाय, अधिगमप्रक्रियाया: अध्ययनाय, बोधनाधिगमप्रक्रियाया: मूल्याकलनाय, पाठ्यचर्याया: अनुदेशनस्य मूल्याकलनस्य च योजनां कर्तुम् एते आयामा: उपयुक्ता: भवन्ति -

**१. अभिवृत्तय: प्रत्यक्षञ्च (Attitudes and perceptions)**

अधिगमसामर्थ्यानां प्रभावोत्पादने अधिगमकौशलानाञ्च विकासे अभिवृत्तय: प्रत्यक्षञ्च बहु योगदानं कुर्वन्ति । उदाहरणार्थं यदि छात्र: कक्षां भद्रताभावरूपेण क्रमरहितरूपेण चिन्तयति, तदाधिगमं प्राप्तुं न शक्नोति । एवमेव छात्राणां कक्षाकार्यविषये कक्षासमस्यानां विषये च ऋणात्मकाभिवृत्ति: भवति चेद् समस्यानां परिहारे प्रयत्नमपि न कुर्वन्ति, तदानीमुत्तम: प्रभावोत्पादकानुदेशनं छात्राणां कृते कक्षाविषये अधिगमे च धनात्मकाभिवृत्तिं प्रापयितुम् उत्तमप्रत्यक्षाय च साहाय्यं करोति । अतः अध्यापकैः छात्रेषु धनात्मकाभिवृत्तिसम्पादने प्रयासः कर्त्तव्यः ।

**२. ज्ञानार्दनं समाकलनं च ( Acquire and Integrate Knowledge)**

नूतनज्ञानार्जनसमये छात्र: पूर्वज्ञानेन साकं नूतनज्ञानं योजयित्वा चिन्तयति चेद् नूतनज्ञानस्य उत्तमव्यवस्थीकरणं भवति । तेन – (i) प्राप्तं ज्ञानं चिरं तिष्ठति । (ii) प्राप्तस्य ज्ञानस्य उत्तमव्यवस्थापनञ्च भवति ।

अत: अध्यापकैः नूतनविषयबोधनसमये आवश्यकं मार्गनिर्देशनं कर्तव्यं भवति । नूतनतया सम्प्राप्तकौशलानां प्रक्रियाणां वा अनुकूलरूपेण परिवर्तनं कृत्वा तद्विषयकं सम्पूर्णं ज्ञानं सम्प्राप्य पुन: निष्पादनप्रक्रिया एव अन्तरीकरणप्रक्रिया (समाकलनप्रक्रिया - Integration) भवति ।

**३. ज्ञानविस्तृति: संस्कृतिकरणञ्च (Extend and Refine Knowledge)**

ज्ञानार्जनेन ज्ञानसमैक्यतासम्पादनेन वा अधिगम: नैव स्थगनीय:। ज्ञानविस्तृतिद्वारा संस्कृतिकरणद्वारा च गभीरावबोधाय प्रयास: कर्तव्य: ।

तदर्थं काश्चन चिन्तनप्रक्रिया: उपयुक्ता: भवन्ति -

- तुलनम् (Comparing)
- वर्गीकरणम् (Classifying)
- मूर्तिकरणम् (Abstracting)
- आगमनविवेचनम् (Inductive Reasoning)
- निगमनविवेक: (Deductive Reasoning)
- संरचनात्मक: सम्बन्ध: (Constructive Support)
- दोषविश्लेषणम् (Analyzing Errors)
- विश्लेषणदृष्टि: (Analyzing Perspective)

**४. ज्ञानस्य सार्थकविनियोग: (Use Knowledge Meaningfully)**

समर्थरूपेण ज्ञानस्य प्रयोगः अत्र भवति । प्राप्तस्य ज्ञानस्य युक्तेषु सन्दर्भेषु अर्थवत् विनियोग: अत्र भवति । The most effective learning occurs when we use knowledge to perform meaningful tasks. अत्र प्राप्तस्य ज्ञानस्य सार्थकतारूपेण संरचनायै षट् चिन्तनात्मकप्रक्रियाः वर्तन्ते -

- निर्णयस्वीकरणम् (Making Decisions)
- समस्याया: परिहार: (Solving Problems)
- नूतनाविष्करणम् (Invention)
- परिशोधनम् (Investigation)
- प्रायोगिकविचारणा (Experimental Enquiry)
- व्यवस्थाविश्लेषणम् (System Analysis)

**५. मनस: शीलोत्पादकता (Productive Habits of Mind)**

उत्तमाधिन्ता उत्तमप्रवृत्तीनां विकासमाप्नोति । The most effective learners have developed powerful habits of mind that enable them to think -

- Critically - विमर्शनात्मकरूपेण
- Creatively - सर्जनात्मकरूपेण
- Self Regulated Thinking - आत्मनियन्त्रणचिन्तनम्

सर्वेषां जनानामस्मिन् स्तरे प्रवृत्ति: नैव भवति ।

**मनस: प्रभावोत्पादकशीलानि एतानि भवन्ति -**

A - **विमर्शनात्मकचिन्तनम्**

- यथार्थरूपेण भवितव्यं यथार्थान्वेषणञ्च कर्तव्यम् । Be acqurate and seak accuracy.
- निर्मल: स्यात् स्पष्टताया: अन्वेषणञ्च स्यात् । Be clear and seak clarity .
- पारदर्शिकता स्यात् ।Maintain an Open Mind.
- उद्वेगानां नियन्त्रणम् ।Restrain impulsivity .
- स्थिते: समर्थने सिद्धैर्भाव्यम् ।Take a position when the situation warrants it.
- अन्येषां भावानां ज्ञानस्तराणाञ्च अनुरूपेण प्रतिस्पन्दनमावश्यकम् । Respond appropriately to others feelings and level of knowledge.

B - **सर्जनात्मकचिन्तनम्**

- दृढाभिनिवेश: । Persevere.
- ज्ञानस्य सामर्थ्यानाञ्च परिमितय: हर्तव्या: । Push the limits of your knowledge and abilities.
- स्वीयमूल्याङ्कनस्तराणामुत्पादनं विश्वसनीयतासम्पादनं निर्वहणञ्च ।Generate, Trust and Maintain your own standards of evaluation.
- साम्प्रदायिकावधिभ्य: अतिक्रान्ततया परिस्थितीनां निरीक्षणद्वारा नूतनमार्गाणामुत्पादनम् । Generate new ways of viewing a situation that all outside the boundaries of standard conventions.

C - **आत्मनियन्त्रणचिन्तनम्**

- स्वकीयचिन्तनानां परीक्षणम् । Monitor your own thinking .
- उचितरूपेण योजनानिर्माणम् । Plan appropriately.
- अपेक्षितस्रोतसां परिचायनमुपयोगश्च । Identify and use necessary resource .
- प्रतिपुष्टे: अनुरूपप्रतिस्पन्दनम् । Respond appropriately to feedback.
- आत्मन: क्रियाणां प्रभावोत्पादकताया: मूल्याङ्कनम् । Evaluate the effectiveness of your actions.

**अधिगमस्तराः**

अधिगमः एका दैनन्दिनप्रक्रिया भवति । अधिगमप्रक्रियाया: उत्तमाधिगमनेन अस्माकं चिन्तनानां पुनस्संरचना उत्तमरूपेण भवितुमर्हति । The better you understand the

learning process the better you will be able to use this understanding in the redesign of your organization.

१. **तथ्यानि (Facts)** - परिशोधनद्वारा साक्षात् निरीक्षणद्वारा फलितांशरूपेण प्राप्तानां विवरणानां तथ्यानां वा विचार: अस्मिन् स्तरे भवति । The first level of learning deals with facts details or data which result from direct observation and research. एतेषां साक्षादुपयोग: न भवति परन्तु, एतद् विना अनन्तराधिगमस्तरं प्रति नैव गमनं भवति ।

२. **समाचार: / सूचना (Information)** - प्राप्तदत्तांशानां प्रयोगस्तर: अत्र भवति । The second level of learning deals with information and observational data in a usable form. अत्र समाचारसम्बद्धप्रश्नाः एवं भवन्ति – कः,कीदृशः,कथम्,कति,कुत्र (who, what, when, where, how Many ) इत्यादीनां प्रश्नानां समाधानमत्र भवति । अनेन पूर्वप्राप्तानां तथ्यानामुपयोगं कर्तुं शक्यते ।

३. **कथं ज्ञातव्यम् (Know-how)** - लब्धसमाचारस्य उपयोग: कथं कर्तव्य: इति अनुदेशनमत्र भवति । Know-how consists of a collection of descriptions in the form of instructions. अत्र अस्माकं अनुभवेन ज्ञानोत्पत्ति: भवति ।

४. **अवधारणा (Comprehension)** - अस्मिन् स्तरे किमर्थम् (Why) इत्यस्य अवबोधनात्मकमुत्तरं भवति । अस्मिन् स्तरे व्याख्यानानां निबन्ध: भवति । The fourth level of learning is composed of explanations . उपरिविद्यमानद्वयो: स्तरयो: उपयोग: अनेनैव भवति ।

५. **विवेक: (Wisdom)** - अधिगमस्तरे अयमन्तिमो स्तर: भवति ।
मूल्यानां सममेलनेन तेषां मूल्याङ्कनसामर्थ्यमत्र भवति । अधिगमविकासे अयं स्तर: अत्यन्तावश्यक: वर्तते । विवेकं विना कथं

ज्ञातव्यम्, अवधारणा (Know-how, Comprehension) इत्यनयो: द्वारा प्राप्तफलस्य व्यवस्थापनं नैव कर्तुं शक्यते |

**********

# जैनदर्शनानुसारं शान्तिशिक्षाया: अवधारणा

डा.नारायणवैद्य:
सहायकाचार्य:, शिक्षाविभाग:
केन्द्रीयसंस्कृतविश्वविद्यालय:
राजीवगान्धीपरिसर:,
शृङ्गेरी - 577139

जैनधर्मानुसारं धर्म:, शान्ति: इत्यनयो: अस्ति अविनाभाव: सम्बन्ध: । शान्तिं विना धर्म: तथैव धर्मं विना शान्ति: न भवति । अत: वक्तुं शक्यते सुखस्य साधनं धर्म: । धर्मेण सुखं शान्ति: आनन्द: च प्राप्यते । प्राचीनकाले शान्तिम् इच्छति स्म । तस्य यत्न: शान्त्या जीवनं यापनीयम् इत्यासीत् । अद्यत्वे शन्ति: न वर्तते न वा प्राप्यते, मह्यं शान्ति: अपेक्षते इत्येवं मानवानां ध्वनि: श्रूयते । संसारेऽस्मिन् भौतिकवस्तूनां प्राप्त्या क्षणिक: शारीरिक: मानसिक: वा सन्तोष: प्राणिविशेषेण अनुभूयते । किन्तु एषा शान्ति: आशान्ते: उत्पादिका न तु वास्तविकी शान्ति: । पूर्णतया शन्ते: मोक्षं प्राप्य एव आत्मा अनुभवति । संयम:, सन्तोष:, त्याग: इत्यादिना क्रमश: शान्तिं प्राप्तुं शक्यते ।

आचार्य: तुलसी वर्येण “क्या धर्म बुद्धिगम्य है” इति ग्रन्थ: रचित: । तत्र लिख्यते यत् शान्ति: बाह्य: पदार्थ: नास्ति । तन्निमित्तं प्रयत्न: करणीय: नास्ति । शान्ति: अत्मन: स्वभाव: अथवा धर्म: उत स्वरूपं विद्यते । अद्यत्वे शान्ते: प्राप्त्यर्थं विशेषरूपेण प्रयत्न: प्रचलति । किन्तु शान्ति: बाह्यपदार्थेन नैव लभ्यते । वस्तुत: विचार्यमाणे यत् आवरणम् आच्छादितं विद्यते तत् वारणीयम् । यदि आशान्ति: न भवति तर्हि शान्ति: स्वत: प्राप्यते । शान्ति: न वा आकाशात्पतति, उत कृषिक्षेत्रे उत्पद्यते । तस्य स्रोत: आत्मा एव भवितुम् अर्हति ।

एवं च शान्ति: आह्लादस्य नाम अस्ति । येन आत्मन: जागृति:, चैतन्यं, पावित्र्यम्, आत्मन: स्वरूपम् इत्यादिनाम् अनुभूति: जायते ।

**जैनदर्शनानुसारं शान्ते: प्रकारा:**

जैनदर्शनानुसारं लोके अनुभूयमानशान्ते: नैके प्रकारा: सन्ति । तेषां ज्ञानम् अत्यावश्यकं भवति । अस्य ज्ञानस्य अभावे विवेक: नोत्पद्यते । जैनमतानुसारं मुख्यरूपेण शन्ते: चत्वार: प्रकारा: वर्तन्ते । [1] यथा –

1. भोगस्य भोग्यसमये प्रतीयमाना शान्ति। :

---

[1] . शान्ति पथ प्रदर्शक

2. कर्तव्यस्य समास्त्यनन्तरम् अनुभूयमाना शान्ति। :
3. प्राणिनां नि। :स्वार्थसेवया उत्पद्यमाना शान्ति:
4. आध्यात्मिकी शान्ति। :

जैनाचार्याणाम् अभिप्रायानुसारम् उपर्युक्तेषु चतुर्षु प्रकारेषु आदौ त्रय: शान्ते: प्रकारा: वास्तविकशान्तिं नैव प्रयच्छन्ति । केवलं क्षणिकसुखं लभ्यते । भोगस्य उपभोगसमये क्षणिकशान्ति: प्रतीयते । न सा वास्तविकी शान्ति: । यत: भोगस्य उपभोगसमये मन: शान्त: न भवति । किन्तु नूतनवस्तुन: उपभोगं कर्तुम् इच्छा उत्पद्यते । यदि सा इच्छा न पूर्यते तर्हि व्यक्ति: अशान्त: एव भवति । एवं प्रकारेण अग्रे उभयत्रापि ऊह्यम् । जैनानां मतानुसारं वास्तविकशान्ति: इत्युक्तौ आध्यात्मिकशान्ति: एव ।

**जैनदर्शनानुसारं शान्तिशिक्षाया: तत्त्वानि**

भारते जैन-बौद्ध-वैदिकादि धर्मा: विद्यन्ते । एतेषां धर्माणां स्वस्य विशिष्ट: सिद्धान्त: अस्ति । जैनधर्म: नैतिकमूल्यानां आध्यात्मिकानुभवानां च दृष्ट्या समृद्धो वर्तते । जैनदर्शने अन्तर्निहितानि अहिंसा, अपरिग्रह:, अनेकान्तादि तत्त्वानि विश्वस्तरे राष्ट्रस्तरे च शान्तिं व्यवस्थापयितुं मानवानां कल्याणार्थं च आधारभूतान् उपायान् उपदिशन्ति । अत: जैनदर्शने निहितानि तत्त्वानि शान्तिशिक्षाया: कृते अत्युपयुक्तानि भवन्ति । तानि चित्रमाध्यमेन प्रदर्शयामि –



एवं प्रकारेण सहिष्णुता, कारुण्यम्, अहिंसा, परोपकार: इत्यादि जीवनमूल्यानि नैव विस्मर्तव्यानि। अनेनैव शान्ति: प्राप्यते।

**शान्ते: व्यवस्थापनाय जैनधर्मस्य उपदेश:**

1. सर्वान् जीवान् प्रीणातु।
2. हिंसां मा करोतु।
3. ब्रह्मचर्यं पालयतु
4. पशुबलिन कर्तव्या। :
5. आधिक्येन धनसङ्ग्रहं मा करोतु।
6. सत्यम् आचरतु।

वर्तमानपरिप्रेक्ष्ये उपर्युक्तजीवनमूल्यानां तिरस्कार: क्रियते। येन समस्या: उत्पन्ना: अभवन्। किञ्च प्राणिकुलं कष्टम् अनुभवति। जीवनमूल्यानां ह्रास: कस्यापि राष्ट्रस्य जाते: धर्मस्य वा समस्या नास्ति। अपितु सम्पूर्णं मानवपरिवारस्य समस्या अस्ति। विद्यार्थी शिक्षकेषु न विश्वसिति। सहाद्यायिभि: सह वैमनस्यम्, अविश्वास: च एधमाना दृश्यते। अद्यत्वे कार्यं गौणं स्वार्थ: प्रधान: अभवत्। एता: समस्या: विहाय अन्या: अपि समस्या: वैश्विकस्तरे अवलोक्यन्ते। कारणं तु जीवनमूल्यानां ह्रास: इत्यत्र नास्ति संशय:।

साम्प्रतं जैनदर्शने वर्णितानां जीवनमूल्यानां शिक्षा अत्यावश्यकी। तत्र विद्यमाना: विषया: पाठ्यक्रमे योजनीया:। तेन विश्वशान्ते: कल्पनां कर्तुं शक्यते।

**सन्दर्भग्रन्था:**


1. शान्तिशिक्षा एवं सतत विकास – श्रीमती राजकुमारी शर्माआगरा ,राधा प्रकाशन मन्दिर ,
2. मूल्य एवं शान्ति शिक्षा – सौरभ सिंहआगरा ,अग्रवाल पब्लिकेशन्स ,
3. शान्ति के लिए शिक्षा – डामेरठ ,बुक डिपो .लाल.आर ,शिवपाल सिंह .
4. मूल्य एवं शान्ति शिक्षा – डाआगरा ,अग्रवाल पब्लिकेशन्स ,रवीन्द्र कुमार .
5. शान्ति शिक्षा – डा आगरा ,राधा प्रकाशन मन्दिर ,शोभा गोलवलकर.


**********

# संस्कृतशिक्षणस्य सिद्धान्ताः

डा. दयानिधि शर्मा
सहायकाचार्यः
शिक्षाविभागः

संस्कृतभाषाशिक्षणस्य वैशिष्ट्यं विषयबोधनाय सर्वथा उपयुक्तं वर्तते । एतस्य प्रमुखं कारणं संस्कृतभाषायाः भाषावैज्ञानिकं तत्त्वं विद्यते । इयं भाषा भारतीयानां सांस्कृतिकभाषा वर्तते । संस्कृतभाषा कस्यापि मातृभाषा नास्ति । राष्ट्रियं गौरवं द्रष्टुं ज्ञातुं च एतस्याः भाषायाः ज्ञानमावश्यकमेव । भाषाशिक्षणस्य सामान्यसिद्धान्ताः भाषाशिक्षणस्य स्वरूपं प्रकटीकुर्वन्ति । शिक्षणं सर्वदा गत्यात्मकं (Dynamic) भवति । प्रत्येकं कालांशे पाठनावसरे शिक्षकः विचिन्त्य विषयान् प्रस्तुयात् । पुनश्च प्रविधेः प्रयोगं कृत्वा छात्रान् बोधयेत् । अपेक्षानुगुणं शिक्षणसूत्राणां प्रयोगोऽपि करणीयः । संस्कृतशिक्षणस्य सिद्धान्ताः अस्मिन् सन्दर्भे विचारणीयाः सन्ति । संस्कृतशिक्षणस्य सिद्धान्ताः अधोलिखिताः वर्तन्ते ;

**प्राकृतिकसिद्धान्तः**

अयं सिद्धान्तः स्वाभाविकतायाः सिद्धान्तः अपि उच्यते । भाषाज्ञानं सर्वदा प्राकृतिकरूपेण भवेत् । बालकाः स्वाभाविकरूपेण भाषां जानीयुः । प्रायशः बाल्यकाले मातृभाषायां बालकाः व्यवहरन्ति । प्रातिवेशिकसमूहेष्वपि व्यवहारस्य माध्यमरूपेण मातृभाषा एव अङ्गीक्रियते । प्राकृतिकरूपेण भाषायै कौशलानां कश्चन क्रमः आवश्यकं भवति । तत्र श्रवणभाषणपठनलेखनादीनां कौशलानि क्रमशः विचार्यन्ते । तत्फलेन संस्कृतभाषया एव वार्तालापः करणीयः ।

**अभ्यासस्य सिद्धान्तः**

भाषायाः विकासार्थम् अयं सिद्धान्तः महत्त्वपूर्णः वर्तते । अयं 'क्रियाशीलतायाः सिद्धान्तः' इत्यपि उच्यते । भाषाज्ञानस्य कौशलाय सर्वदा अभ्यासाः करणीयाः । अभ्यासं विना भाषायाः ज्ञानं नैव भवितुमर्हति । भाषायाः अभ्यासार्थम् अधोलिखिताः अंशाः विचारयोग्याः वर्तन्ते ;

(1) भाषा केवलं भाषामाध्यमेन एव पाठनीया ।

(2) शुद्धोच्चारणस्य कृते यत्नशीलता अपेक्ष्यते ।

(3) व्याकरणनियमानां परिज्ञानम् ।

(4) अभिव्यक्तिकौशलसम्पादनम् ।

(5) वाचनकौशलस्य अभ्यासः ।

(6) सुभाषितानाम् अभ्यासः ।

(7) अर्थग्रहणक्षमतायाः विकासः ।

(8) भाषासन्दर्भे अध्येतुं रुच्युत्पादनम् ।

उपर्युक्ताः विचाराः अवधेयाः अंशाः च भाषाज्ञानस्य अभ्यासाय उपयुक्ताः सन्ति । तथैव वार्तालापे बलं देयम् । वार्ताम् आलाप्य भाषसम्बद्धः अभ्यासः भवितुमर्हति । क्रियाशीलता एव मुख्यं कारणं भवति येन बालकाः भाषाभ्यासे दक्षाः भवन्ति ।

**मौखिककार्यस्य सिद्धान्तः**

बाल्यकालादारभ्य बालकः भाषासम्बद्धान् नियमान् नैव जानन्ति । सः केवलं व्यावहारिकीं भाषामेव ज्ञातुं पारयति । परिजनैः सह भाषां विश्रूय सः व्यवहरति । तस्य सर्वं सम्भाषणं केवलं मौखिकरूपेण एव भवति । भाषायाः मौखिकं रूपमेव आदौ आश्रयणीयं विद्यते । तदनन्तरं लिखितं रूपं व्यवहारे अङ्गीकरणीयमिति कर्णाभ्यां सावधानतया श्रवणेन शनैः शनैः बालकाः मौखिकरूपेण विचाराणां प्रकटीकरणे समर्थाः भवन्ति । प्राचीनकाले भाषायाः मौखिकरूपमेव आधिक्येन व्यवहारे आसीत् ।

**वैयक्तिकभिन्नतायाः सिद्धान्तः**

कक्ष्यायाम् अध्ययनरताः छात्राः कदापि बौद्धिकस्तरे समानाः न भवन्ति । तेषु वैयक्तिकभिन्नता भवत्येव । मानसिकक्षमतायाः आधारेण एव इयं भिन्नता छात्रेषु परस्परं दृश्यते । प्रायशः भिन्नतायाः निम्ननिखितानि क्षेत्राणि वर्तन्ते ;

(1) उच्चारणम्

(2) व्याकरणांशानां ज्ञानम्

(3) मानसिकयोग्यता

(4) वर्तनीसम्बद्धं ज्ञानम्

(5) भाषार्जनाय उपयुक्तं वातावरणम्

(6) वाणीगताः चेष्टाः

**अनुपातक्रमयोश्च सिद्धान्तः**

सर्वत्र समाजे भाषायाः ज्ञानस्य आधारस्तु अभ्यासो एव वर्तते । भाषायाः विकासो अपि उचितक्रमेण अनुपातस्य सिद्धान्तानुसारं भवेत् । भाषायाः निश्चितः क्रमः सर्वदा विचारणीयः वर्तते । अधोलिखितरूपेण क्रमः चिन्तनीयः विद्यते ;

(1) भाषायां मौखिककार्याणि

(2) उच्चारणस्य कृते यत्नाः

(3) कोशसन्दर्भे ज्ञानवर्धनम्

(4) छन्दसां श्लोकानां च परिज्ञानम् ( स्मरणमपि )

(5) व्याकरणनियमानां विशिष्टं ज्ञानम्

(6) लेखनाभ्यासः

(7) रचनाकार्यम् अपठितविषयाणां सन्दर्भे अध्ययनञ्च

उक्तांशानां प्राधान्येन क्रमशः अभ्यासं कृत्वा छात्राः लाभान्विताः भवन्ति । अनेन शनैः शनैः भाषाभ्यासाः वृद्धिमाप्नुवन्ति ।

**समवायसिद्धान्तः**

अयं सिद्धान्तः मूलरूपेण बहूनां प्रमुखांशानां समन्वयं सङ्केतयति । संस्कृतभाषाक्षेत्रे तादृशाः बहवः अंशाः सन्ति । कक्षायाः स्तरानुगुणं सकारात्मकचिन्तनरूपेण च अयं सिद्धान्तः प्रवर्तते । विविधपरिस्थितीनां सन्दर्भे विचारं कृत्वा अयं सिद्धान्तः संस्कृतभाषाशिक्षणस्य कृते उपयोगी विद्यते । अस्मिन् प्रक्रमे सर्वदा सावधानतया सम्भूय अध्ययनस्य कृते छात्रेषु रुचिः उत्पदनीया ।

**चयनस्य सिद्धान्तः**

पाठक्रमस्य अङ्गत्वेन अयं सिद्धान्तः महत्त्वपूर्णः वर्तते । विविधदिवसानाम् आयोजनं तेषां प्रसङ्गे वैशिष्ट्यबोधनं च मुख्यं भवति । पुनश्च पाठानुगुणं ऋतूनां सन्दर्भे च बहूनामुत्सवानाम् आयोजनं करणेन छात्राः लाभान्विताः भवन्ति । अध्यापनकाले कालांशानुगुणं विषयविभजनं कृत्वा पाठाः पाठनीयाः । एवं करणेन कक्षाशिक्षणं रुचिकरं भवति ।

उपर्युल्लिखिताः सिद्धान्ताः कक्षायां पाठनावसरे अध्यापकानां कृते उपयोगिनः भवन्ति । एतेषां प्रयोगकरणेन छात्राः उत्साहिनः दृश्यन्ते । पाठ्यक्रमः कथं मनोवैज्ञानिकरीत्या पाठनीयः इत्यपि सरलतया ज्ञायते । प्रत्येकं संस्कृतभाषाशिक्षकः एतेषां सिद्धान्तानां परिपालनम् अवश्यमेव कुर्यात् । राष्ट्रस्य विकासाय एतादृशः यत्नः सर्वदा आचरणीयः ।

**सन्दर्भाः (References)**

पाण्डेय , रामशकल ; संस्कृतशिक्षण , आगरा : विनोद पुस्तक मन्दिर

मित्तल , सन्तोष ; संस्कृतशिक्षणम् , जयपुर : नवचेतना पब्लिकेशन्स

भारतोदय ( मासिकी पत्रिका ) ; ज्वालापुर हरिद्वार : गुरुकुल महाविद्यालय

चौबे , विजयनारायण ; संस्कृत शिक्षण विधि , लखनउ : उत्तर प्रदेश हिन्दी संस्थान

**********

# साम्प्रतिकयुगे अर्थस्य महत्त्वम्

रीमा पधान

शिक्षाशास्त्री प्रथमवर्षम्

अनुक्रमाङ्कः – 804

अस्मिन् जगति अर्थस्य महान् महत्वं वर्त्तते । भौतिक सुखस्य कारणं भवति धनम् । प्राणीनां जीवनम्, सर्वस्वम्, सर्वार्थसाधकं च भवति । धनाभावे विद्योपार्जनमपि कर्तुं न शक्यते । पाठाशाला-मन्दिर-धर्मशालानां निर्माणम्, अतिथीनां सत्कारः, विवाहः, जन्मोत्सवादिनां, मृतस्य अन्त्येष्टिक्रिया अपि धनेन विना कोऽपि कर्तुं न शक्यते । बलं शक्तिः समृद्धिगुणार्जन ज्ञानविज्ञानवाप्तिः च सर्वमपि अर्थेन एव सिद्ध्यति । राज्ञामपि प्रभुत्वस्य मूलं धनमेव भवति । यथोक्तम् –

**"धनवान् बलवाल्लोके सर्वः सर्वत्र सर्वदा ।**

**प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ।।"** (हितो. १/१२२)

चतुर्वर्गगणनायाः अवसरे अपि अर्थस्य स्थानं विद्यते । मानवस्य सर्वाः कामनाः धनाभावात् निष्फलाः भवन्ति । धनमेव सर्वविधां मनोकामनां पूरयति । इयं सर्वकार्यस्य प्रधानतमं साधनं एव वर्तते । धनसम्पन्नानां पुरुषाणां धनमे यशसः मूलकारणम् भवति । यस्य पार्श्वे धनं अस्ति । सः पण्डितः, गुणज्ञः, योग्यवक्ता तथा दर्शनीयः भवति । परन्तु शोभां न प्राप्नोति । न केवलम् अस्मिन्नेव युगे अपि तु सर्वासु युगेषु अपि कश्चन महान् महिमा वर्णितः अस्ति । धनाभावे कः अपि दानवीरः दानशिरोमणिः भवितुं नार्हति ।

अस्मिन् लोके दृश्यते यत् अर्थमेव सर्वासां विद्यानां लक्ष्यम् । धनमेव सर्वः मनोरथं पूरयति । धनाभावे अर्थात् दारिद्र्यसमये कः अपि मित्रः सम्बन्धी वा भवितुं न इच्छति । धनवान् जनः समाजे सम्मानीय भवति, विद्वान् इव आदरं च प्राप्नोति । अत एवोक्तम् –

**"यस्यार्थास्तस्य मित्राणि, यस्यार्थास्यस्य बान्धवाः ।**

**यस्यार्थाः स पुमांल्लोके, यस्यार्थाः स च पण्डितः ।।"**

यस्य पार्श्वे धनं न भवति , तस्य अभिलाषायाः पूर्त्तिः न भवति । धनाभावः अर्थात् दारिद्र्यम् अत्यन्तं दुःखदायकं भवति । धनिकस्य वचने सर्वे जनाः विश्वासं कुर्वन्ति । परन्तु निर्धनस्य वचनं सर्वदा अविश्वसनीयां मन्यन्ते । तस्य स्वीयः अपि जनः परकीयः जायते । अर्थः जीवनस्य आधारभूत - आवश्यकता वर्त्तते । यस्य विना कः अपि स्वदैनिकजीवनस्य आधार भूत आवश्यकतायाः पूर्णं कर्तुं न शक्नोति । धनं स्वास्थ्यसम्पत्तिः च जीवननिमित्तं अत्यन्तं आवश्यकं भवति ।

**********

# गीर्वाणगीते विश्वविद्यालयः

मञ्जुलता बेहेरा
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 805

पुण्योश्रृङ्गगिरौ पुण्यपयोधितीरे
विराजते यत्र श्रीशङ्करनिवासी ।
त्रिलोकसारे श्रीहरेः श्रीपीठे
गीर्वाणगीतेः विश्वविद्यालयः ।।१।

सत्तत्त्व- चित्सत्तानुसन्धाने मग्नः
परापराविद्ये संसाधनीये ।
निगमागमानां नु तत्त्वसारः
वितीर्यते अत्र विद्या हि ध्येया ।।२।।

मीमांसा-साहित्य-वेदान्त-वास्तुशास्त्रं
धातुशब्दानां भण्डारः ननु व्याकरणशास्त्रं ।
ज्योतिषां विज्ञानं च न्यायशास्त्रं
तत्त्वप्रमाणाय सर्वदर्शनशास्त्रम् ।।३।।

शिक्षाप्रावीण्यकौशलशिक्षणार्थं
विराजते हि शिक्षाशास्त्रं वितानं ।
पुराणमित्येव तन्नव्यतायै
विद्याविधौ संगणकं प्रविष्टम् ।।४।।

विद्यानिधौ संसाधकशेवधौ तु
दिव्याङ्गनेऽत्र देवविद्यार्थिनः ।
प्रमाणशब्दार्थभाष्येषु लग्नाः
संसिद्धे शास्त्रे ब्रह्मर्षि - तर्पणम् ।।५।।

श्रीशङ्करपीठः प्रतिष्ठितोऽत्र
भारतीतीर्थः गुरु विद्यमान यत्र ।
विधुशेखरः शिष्य एते सर्वाविद्याधिगता
ब्रह्मप्राप्तिं मोक्षं प्राप्तवन्तः सदा।।६।।

श्रीगीतगोविन्दप्रसिद्धपद्यैः
विलासनिद्रा कल्प्यते सुभक्त्यैः ।
श्रीपीठं सुन्दरं चारुचित्रैः
श्रीशारदाम्बा समं सामरूपैः ।।७।।

श्रियं मङ्गलं पुण्यं सन्निधानं
वितनोति विश्वाय सदा प्रसन्नम् ।
श्रीलक्ष्मी - श्रीविद्या - निकेततीर्थं
श्रीशारदासम्पदा पूर्णक्षेत्रम् ।।८।।

**********

## विज्ञानं वरदानम् अभिशापो वा

शुश्रीसीमिता साहु
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 806

वर्तमानयुगो विज्ञानस्य युगो गण्यते । विशिष्टं ज्ञानं विज्ञानम् इत्युच्यते । अस्माकं प्राचीनसाहित्ये विज्ञानशव्दः आत्मज्ञानाय प्रयुक्तं दृश्यते, परन्तु अधुना इयं शव्दः विषेशाभिप्रायम् अभिव्यनक्ति । व्यक्तिः कस्यापि पदार्थस्य सर्वेषां सूक्ष्मातिसूक्ष्म गुणानां सम्यक्तया परीक्षणं कृत्वा मानवहितार्थं तेषां उपयोगकरणमेव विज्ञानं भवति । संसारः अयं वैज्ञानिकानां नूतनं नूतनम् आविष्कार दृष्ट्वा आश्चर्यचकितमिव भासते । सत्यमेवोक्तम् –

**"असम्भवं नाम न विद्यते क्वचित्**
**किमप्यकार्यं न दृशि प्रतीयते ।**
**दिने दिने साम्प्रतिके युगे असौ**
**विज्ञानमहिमा नितरां विवध्यते ।।"**

**लाभाः-**

सङ्गणकस्य (Computer) आविष्कारं विज्ञानस्य सर्वोत्कृष्टः उपलब्धिः । आधुनिकयुगे अस्य उपयोगः अवर्णनीयः । सङ्गणकं विना किमपि कार्यं न सिद्ध्यति यथा लेखनं गृहनिर्माणं रोगाणां परीक्षणं शिक्षाक्षेत्रे मनोरञ्जनक्षेत्रे गमनागमनक्षेत्रे व्यवसायिकक्षेत्रे पर्यावरणक्षेत्रेषु च ।

* गमनागमने विज्ञानेन आविष्कृतं रेलयानेन वायुयानेन जलयानेन च मानवस्य सर्वं कार्यं सौकर्येण शीघ्रातिशीघ्रं सम्पादयितुं शक्यते।

* विद्युतोपकरणं यथा AC कूलर् विद्युत् व्यजनानि आदि उपकरणानां प्रयोगेण मानवः सुखं प्राप्नोति।

* विज्ञानेन आविष्कृतैः विविधैः यन्त्रैः कृषिक्षेत्रे अल्पेनैव कालेन बहूनि असाध्यानि कार्याणि सम्भवन्ति।

* विज्ञानेन आविष्कृतायाः परमाणुशक्त्याः उपयोगः प्रायः शान्त्यार्थमेव भवति।

* सञ्चारक्षेत्रे अपि अन्तर्जाल-तार-टेलिप्रिन्टर्-दूरदर्शनम् आदीनां माध्यमेन जगति यत्रकुत्रापि स्थितेन परिचितेन द्रष्टुं सम्भाषणं च कर्तुं शक्यते।

* मुद्रणलयानाम् आविष्कारेण शिक्षाप्रसारक्षेत्रे विज्ञानं महत् साहाय्यं आचरति। विविधवर्णयुक्तानि चित्राणि मुद्रयितुं शक्यते। पुस्तकप्रकाशने व्यवसाये च अपूर्वा क्रान्तिः प्रवृत्ता। दूरदर्शनमाध्यमेन सर्वे अपि नूतनो गतिविधयः प्रत्यहम् अनायासेन प्राप्यते।

**दोषाः-**

विज्ञानस्य यथा लाभाः तथा दोषाः अपि सन्ति। यथा विज्ञानेन उपकृतं तथैव अपकृतमपि लक्ष्यते। विज्ञानस्य प्रभावेण जीवनं धर्महीनं , चरित्रहीनं , मनोबलहीनं , कर्मठताहीनं, सालसं दृश्यते।

* सङ्गणकस्य प्रयोगेण भूरि अनैतिककार्यं दृश्यते।

* यान्त्रिकवाहन प्रयोगेण बहु दुर्घटनाः तथा वायुप्रदूषणमादि भवति । वायुप्रदूषणेन बहवः श्वासरोगाः जायन्ते।

* AC , कूलर् , व्यजनानि आदि प्रयोगेण CFC निर्गतं भवति। यद्वारा ओजोन् स्तरस्य क्षयः भवति एवं च एसिड्र् रेन् (Acid Rain) भूत्वा बहूनि भवनानि नष्टानि भवन्ति।

* कृषिक्षेत्रे रासायनात्मकप्रयोगकारणात् मृतानां म्रियमाणानां संख्या वर्धत्येव नित्यम्।

* परमाणुशक्तिः शान्त्यर्थमेव उपयोक्तव्या परन्तु कुत्रचित् आस्याः शक्त्याः प्रयोगः विनाशाय अपि भविष्यति यथा हिरोशिमानागासाकी अस्य उदाहरणं वर्तते।

साम्प्रतिके काले जगति यादृशी स्थितिः विद्यमानास्ति तस्यां स्थितौ कस्यापि नरस्य जीवनं विज्ञानेन विना भवितुं न शक्नोति। अतः यदि दोषाणां निराकरणं क्रियते तर्हि विज्ञानं वरदानरूपं भवितुम् अर्हति इति ममाशा।

**********

# समाजे सांस्कृतिकपरिवर्तने संस्कृतज्ञानां भूमिका

कीर्ति नागराज हेगडे
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 807

**"संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।**
**संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते ॥"**

भारतीयसमाजस्य अभिन्नं तत्त्वद्वयं भवतः संस्कृतसंस्कृत्यौ । संस्कृतं संस्कृतिरिति नाणकस्यैकस्य मुखद्वयमिति वक्तुं शक्यते। संस्कृतभाषा भारतीयसंस्कृतेः भारतीयसमाजस्य च आत्मा वर्तते। संस्कृतमाध्यमेनैव भारतीयसंस्कृतिः सुप्रतिष्ठितमस्ति। यथोक्तं प्राचीनऋषिभिः – "**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा**" इति। परन्तु साम्प्रतकाले समाजं भारतीयसंस्कृतेः विमुखं गम्यमाने सति समाजे संस्कृतरक्षणे एवं सांस्कृतिकपरिवर्तने संस्कृतज्ञानां भूमिका महती वर्तते।

संस्कृतभाषा तु विश्वस्य प्राचीनतमा अत्यन्तशुद्धा व्याकरणसहिता च भाषा वर्तते। सम्पूर्णभूमण्डलस्य प्राचीनार्वाचीनभाषासु अस्याः एव 'देवभाषा' इति अभिदानमिति विशेषः। एतादृशसंस्कृते एव वेद-उपनिषत्-शास्त्र-गीता-रामायण-महाभारत-गणित-दर्शन-ज्यौतिष-साहित्य-नीति-इतिहास-गद्य-पद्य-चम्पू-नाटकादयः विरचिताः सन्ति। एते विषयाः एव किल जनव्यवहारेषु प्रचलन्ति। अतः संस्कृतिः संस्कृतेन एव तिष्ठति। संस्कृत्याः मूलं संस्कृतमेव इत्यतः तस्य रक्षणकार्ये संस्कृतज्ञानां महती श्रमः प्राचीनकालादपि आसीत् अद्यापि वर्तते एव।

प्राचीनकाले राजा एवं समाजः द्वावेव संस्कृताध्ययनस्य पोषणं कुरुतः स्म। राज्ञाम् आस्थाने संस्कृतज्ञानां कवीनां च सम्माननं प्रोत्साहनञ्च भवति स्म। समाजस्य सर्वेषु कार्येषु संस्कृतस्य गरिष्ठः सम्बन्धः आसीत्। तदा संस्कृतज्ञैः प्रत्येकसामाजिकक्षेत्रेऽपि अनिर्वचनीयकार्याणि कृतानि। तेन सह विज्ञान-कला-साहित्यादिषु सर्वविषयेषु तेषामपरिमितपरिश्रमेण धीःशक्त्या च तैः ज्ञानभाण्डागारः एव निर्मितोऽस्ति।

काले गते संस्कृतज्ञानां स्तिथिः पूर्ववत् न स्थिता। आङ्ग्लेयानां शासनकाले शिक्षापद्धत्याः काचन अव्यवस्था जाता यदस्माकं संस्कृतिः ऐतिहासिकपरम्परा संस्कारः सर्वमपि व्यर्थं हानिकारकञ्चेति भावना देशे सर्वत्र उत्पन्ना। भारतीयसंस्कृतिं परित्यज्य वैदेशिकसंस्कृतिमनुसर्तुं प्रारब्धवन्तः जनाः। शनैः शनैः संस्कृतज्ञानां परिस्थितिः अधोगतिं प्राप्तम्। ये पूज्याः आसन् ते एव समाजे अत्यन्तमुपेक्षिताः अभूवन्। काश्मीरपण्डितानामवस्थां वयं जानीम एव। एवं चेदपि समाजे संस्कृतिः दृढं तिष्ठतीति चेत् तत् संस्कृतज्ञानाम् परिश्रमेण एव।

सर्वाः अपि भाषाः स्वसंस्कृतेः प्रसारार्थं विद्यमानाः उपायाः भवन्ति। संस्कारस्य अथवा संस्कृतेः परम्परापरिवर्तनमेव भाषायाः मुख्यं लक्षणम्। मानवः यस्यां भाषायां भाषते तस्याः भाषायाः एव संस्कृतिः तस्मिन् मानवे विकासः भवति। आङ्ग्लं भाषन्ते आधुनिकभारतीयाः तत्संस्कृतिमेव अनुसरन्ति। एतादृशम् आधुनिकसमाजं पुनः संस्कृतीकर्तुं संस्कृतज्ञैरेव शक्यम्। संस्कृत्याः जागृतीकरणार्थं, जनान् संस्कृतभाषायाः सान्निध्यं प्रापयितुं संस्कृतज्ञाः एव सर्वसमर्थाः।

सकलभारतीयभाषाणामपि स्वसंस्कारान् सर्वानपि संस्कृतज्ञानां द्वारा सर्वत्र सम्प्रसारयति इयं संस्कृतवाणी। भारतीयसमाजे सांस्कृतिकपरिवर्तनस्य अविभाज्याङ्गाः वर्तन्ते संस्कृतज्ञाः। भारतदेशस्य संस्कृतिनामककमलस्य विकासाय संस्कृतस्य सूर्यस्य उदयः अनिवार्यः एव। अतः समाजे संस्कृतसूर्यस्तु संस्कृतज्ञैर्विना अन्यैः कैरपि उत्पादयितुं न शक्यते। तन्महत्कार्यस्तु संस्कृतज्ञैरेव करणीयः वर्तते।

**********

## भाषाशिक्षकः एव समाजस्य उत्तरदायी

श्वेता जि. एस्.

शिक्षाशास्त्री प्रथमवर्षम्

अनुक्रमाङ्कः – 808

भाषा एका सामाजिकीप्रक्रिया, भावाभिव्यक्तेः साधनं च अस्ति। भाषां विना समाजे अस्माकं व्यवहारः कष्टायते। प्रपञ्चेऽस्मिन् बहव्यः भाषाः सन्ति। तत्र यः भाषां बोधयति सः भाषाशिक्षकः इत्युच्यते। उत्तमसमाजस्य निर्माता भवति शिक्षकः तत्रापि महत्वं स्थानं भजते भाषाशिक्षकः।

शिक्षकः एव समाजस्य उत्तरदायी अस्ति तत्र पुनः भाषाशिक्षकः इति किमर्थमितिचेत्- भाषाशिक्षकः न केवलं भाषां बोधयति अपि तु जीवनमूल्यं बोधयति। किन्तु इतरशिक्षकाणाम् एतदसाध्यं भवति। इतरविषयशिक्षकाः न शक्नुवन्ति इति न किन्तु वस्तुतः तैः यद्बोधनीयमस्ति तदर्थमेव समयः अलं न भवति। विरामकालेष्वपि विशेषकक्ष्याः स्वीकृत्य पाठयन्ति। तन्मध्ये मूल्यशिक्षणं कदा यच्छन्ति? किन्तु भाषाकक्षायां जीवनस्य कृते आवश्यकानि मूल्यानि लभ्यन्ते। यथासुभाषितानि, नीतिकथाः, गद्यं, पद्यं, महापुरुषाणांजीवनकथा, प्रबन्धः, पत्रलेखनम्, व्याकरणञ्चेति बहवः विषयाः भवन्ति। अनेन किं कर्तव्यम्-किं न कर्तव्यं, यदुत्तमम्-यदनुत्तमम्, यः

धर्मः-यः अधर्मः इत्यादीनां ज्ञानं भाषा कक्षायां भवति-भाषाज्ञानं च अत्रैव भवति। अतः भाषाशिक्षकः समाजस्य उत्तरदायी भवति। न केवलं भाषा शिक्षकत्वेन किन्तु विविधपात्राणि ऊढ्वा उत्तमसमाजनिर्माणाय प्रयतते। यथा-

1. भाषाशिक्षकः चालकः इव भवति कक्षायाम्। सः यथा जनान् लक्ष्यं प्रापयति तद्वत्भाषाशिक्षकः सन्मार्गे नयति, जीवनलक्ष्यं प्राप्तुं सहाय्यं करोति।
2. भाषाशिक्षकः विदूषकः भवति कक्षायाम्। सः यथा सर्वान् रञ्जयति तथा शिक्षकः छात्रान् रञ्जयति। कक्षायां गायति, हसति, अभिनयं करोति, हासयति तद्वारा छात्रान् बोधयति।
3. भाषाशिक्षकः कलाकारः भवति कक्षायाम्। सः कक्षां स्वकलाद्वारा आकर्षणीयं करोति। छात्राणां कृते मूल्यशिक्षणं दत्वा उत्तमम् आकारं ददाति।
4. भाषाशिक्षकः मनोवैद्यः भवति कक्षायाम्। सः छात्राणां मानसिकस्थितिं ज्ञात्वा तदनुगुणं ज्ञानरूपं चिकित्सां ददाति।
5. भाषाशिक्षकः अभियन्ता भवति कक्षायां सः नूतनभविष्यनिर्माणार्थं सदृढस्तम्भान्निर्माति कक्षायाम्।

भाषा ज्ञानं सम्यक्भवति चेदेव अन्यान्विषयान् अवगन्तुं शक्नुमः। जीवनमूल्यानि च भाषाशिक्षाद्वारा प्राप्यते इत्यतः भाषाशिक्षकः एव समाजस्य उत्तरदायी भवति।

**********

## साहित्यम्

ज्योत्स्नाराणी जेन

शिक्षाशास्त्री प्रथमवर्षम्

अनुक्रमाङ्कः – 816

पूण्यभूमिः भारतवर्षस्य सौन्दर्यं वैचित्र्यं च अनुभूय जीवनस्य अन्तिमकाले भगवान् बुद्धः उक्तवान् –

"चित्रं जम्बूद्वीपं मनोरमं जीवितं मनुष्याणाम्" ।

भारतस्य परिचयः भवति तस्य सुप्रसिद्धया विश्वविख्यातया संस्कृत्या परम्परया एवं च साहित्येन । साहित्यमेकं एतादृशं पदं यस्य पदस्य श्रवणमात्रेण मनसि विराजते शान्तिः , हृदये

संचरति एकः अद्भुतः आनन्दः एवं रसमयानुभूतिः । “ **सहितयोर्भावः साहित्यम्** ” अर्थात् शब्दानाम् एवम् अर्थानाम् आलङ्कारिकरससिक्तसंयोजनं साहित्यनाम्नाभिधीयते ।

यथोक्तं –

**“साहित्यसङ्गीतकलाविहीनः**
**साक्षात् पशुः पुच्छविषाणहीनः ॥”**

भगवता दत्ताः विशिष्टशक्तेः अधिकारिणः भवन्ति कवयः , यद्द्वारा समग्रसृष्टेः साहित्यम् एकं विशिष्टं स्थानं अलङ्करोति यत् साधारण मनुष्यः कर्तुं न शक्नोति । कवीनां अनुभवात् एवम् अनुभूतेः निर्झरितस्वतप्रवृत्ता अविरतधारा तेषां लेखनीमुखेन परिस्फुटितं भवति , तद् काव्यं कवितारूपेण उद्भाषते । कविदृष्टेः अनन्त – असीम - आन्तरीक्षपर्यन्तं व्याप्तिर्भवति एवम् अतलसमुद्रसमगभीरा च भवति । तया तीक्ष्णदृष्ट्या संसारस्य प्रत्येकं कायं वस्तु च तस्य तीक्ष्ण शब्देन सज्जीकरोति , यत् कोलाहलपूर्णसंसारे मानवस्य क्लान्तिमयमूहूर्तस्य आह्लादप्रदायिनी चास्ति ।

यथा बिन्दोः सिन्धोः च उत्पतिर्जायते , तथैव अर्थपूर्णरसपूर्णशब्दानां संयोजनेन साहित्यस्य उत्पतिर्भवति । अमीषां काव्यनां कवितानां च समाहारः साहित्यमिति कथ्यते । साहित्यशास्त्रस्य एकं वैशिष्ट्यं वर्तते यत् एकैव शब्दे बह्वर्थस्य समायोजनम् । साहित्ये अपि तद् निहितमस्ति यत् मानवं स्वर्गसुखं प्रददाति एवं मोक्षसाधने मार्गं दर्शयति ।

**“ काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥”**

इदं काव्यं साहित्यं हि यशसे अर्थलाभाय व्यवहारज्ञानाय पापविनाशाय परमानन्दप्राप्तये कान्तासम्मित – कर्तव्योपदेशाय च प्रशंस्यते ।

**********

## अध्ययनम्

अनिता नायक
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 817

ध्यानमूलं विचारणमभ्यासनं पठनं च अध्ययनं भवति । अध्ययनेन ज्ञानं वर्धते , कार्यसम्पादनशक्तिः च उदेति।जीवनस्य सरलतायाः कृते अध्ययनस्य अत्यन्तम् आवश्यकता अस्ति।अतः एव अध्ययनं मानवहिताय परमावश्यकम्। अध्ययनस्य सम्बन्धः विद्यया साकं

भवति।बहुलाः विविधाः प्रकारकाः च विद्याः वर्तन्ते।अध्ययनं मनुष्याणां जीवने सदा भवति परं नियमपूर्वकं विद्यास्वीकारः एव अध्ययनं प्रत्यक्षरूपेण बोध्यते। प्राचीनकाले अध्ययनस्यातीव महत्त्वम् आसीत्। बालकाः उपनयनसंस्कारानन्तरं गुरुकुलं गत्वा विद्याध्ययनम् कुर्वन्ति स्म। परन्तु अधुना तथा नास्ति। अधुना विद्यालयेषु गुरुकुलेषु वा अध्यापकेभ्यः शिक्षकेभ्यः वा विद्याप्राप्तिः अध्ययनं भवति। ज्ञानप्राप्तिः एव अध्ययनस्य मूलप्रकृतिः। अतः श्रीमद्भगवद्गीतायाम् उक्तम्-

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**

**तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥**

सामान्यतः विद्यालयेषु शिक्षकेभ्यः छात्राः विद्यां प्राप्नुवन्ति प्रमाणपत्राणि च लभ्यन्ते। परं यदा मनुष्यः स्वतः ज्ञानार्थं तत्परः भवति,तदेव तेन सत् ज्ञानं प्राप्यते। मननं, स्वाध्यायः, चिन्तनम् इत्यादिभिः अध्ययनस्य पर्यायरूपाणि ज्ञातव्यानि। स्वचित्तया ध्यानेन एकाग्रमनसा वा कस्यचित् शास्त्रस्य चिन्तनं मननम् वा स्वाध्यायं भवति। अतः उपदेशवाक्यम् अस्ति यत्- स्वाध्यायप्रवचनाभ्यां न प्रमादितव्यम्। अत्र स्वाध्यायस्यार्थ आत्मनः शुद्धिश्च जायते।प्राचीनकाले चिन्तने स्वाध्याये हि महर्षयः स्वजीवनं यापितवन्तः। अध्ययनेनैव मानवः विद्वान् भवति। तस्य बुद्धिः परिष्कृता भवति। अतः अध्ययनं सदैव मनसा कर्त्तव्यं न तु समययापनम्।

विद्यालयेषु अपि ये छात्राः ध्यानेन पठन्ति तेषामेव अध्ययनं सफलं भवति। अध्ययनेन मनुष्यस्य कृते जगति कीर्तिः लभ्यते। चतुर्वर्गफलप्राप्तिरपि स्वाध्यायात् सम्भवति। अध्ययनेन मानवः ब्रह्मज्ञानं प्राप्तुं शक्नोति। अध्ययनम् मानवस्य चित्तं शुद्धिः करोति,बुद्धिः प्रसादयति गौरवं च प्राप्यते।अतः अध्ययनं ध्यानपूर्वकम्, प्रयत्नशीलं च भवेत्। श्रीमद्भगवद्गीतायां उक्तम्-

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।**

**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥**

अर्थात् केचित् पुरुषाः द्रव्यसम्बन्धी यज्ञं कुर्वन्ति, केचित् तपस्यारूपकं यज्ञं कुर्वन्ति, केचित् योगरूपकं यज्ञं कुर्वन्ति, केचित् प्रयत्नशीलाः पुरुषाः स्वाध्यायरूपकं ज्ञानयज्ञं कुर्वन्ति। अध्ययनेन मनुष्यः स्वकर्त्तव्यं जानाति। यदि एवं सः न कुर्यात् तर्हि स्वजीवनम् अन्धतुल्य सन् यापयति। जीवने च सरलतां न प्राप्नोति। आत्मज्ञानम् अध्ययनेनैव भवति। सदाचारः, शान्तिः, सन्तोषः, मुक्तिः सर्वम् अध्ययनेनैव सम्भवति। महात्मा बुद्धः अतिकालपर्यन्तं आहारमपि विस्मृत्य ध्याने चिन्तनं कृत्वा ज्ञानं लब्धवान्। अतः निर्दिष्टम् उद्देश्यानुसारं सततमध्ययनं करणीयम्।

**********

# अधिगमप्रक्रिया

गणेश तिम्मण्ण भट्ट

शिक्षाशास्त्री प्रथमवर्षम्

अनुक्रमाङ्कः – 821

अधिगमप्रक्रिया जन्मत: मृत्युपर्यन्तं प्रचलति । बाल: प्रप्रथमं दीपस्य रश्मिं पश्यति । औत्सुक्येन स: रश्मिं प्रति स्वहस्तं प्रसारयति । रश्मे: पार्श्वे हस्ते प्राप्ते सति तेजस: अनुभव: जायते । परिणामस्वरूपं स: रश्मिपार्श्वत: स्वहस्तं वारयति । तत: कदापि स: दीपस्य रश्मिं दृष्टे सति तस्य पार्श्वे शरीरस्य कमपि अङ्गं न नयति । रश्मिं दृष्ट्वा औत्सुक्यस्य उद्भवनम् , औत्सुक्येनैव दीपस्य रश्मिग्रहणस्य प्रयासस्य च स्वास्वाभाविकानुक्रिया अस्ति । अनया स्वाभाविकानुक्रियया एव बालस्य अनुभावप्राप्तिर्भवति, अनेनैवानुभवेन स: ज्ञास्यति यत् रश्मिग्रहणेन हस्तो दहति । भविष्ये दीपके दृष्टे तस्यानुक्रिया पूर्ववत् न भवति । अत: इदानीं स: रश्मिपार्श्वे हस्तं न नयति । व्यवहारे परिवर्तनमिदम् अनुभवमाध्यमेनैव आगतमस्ति । वयम् इदमपि कथयितुं शक्नुम:यत् बाल: इदं शिक्ष्यते यत् रश्मिग्रहणे हस्तज्वलनं भवति । अत एव अधिगमस्यार्थ: अनुभवेन व्यवहारे परिवर्तनमस्ति।

जीवने अधिगमस्य अतिमहत्वं विद्यते । शिक्ष्यायाः एकमात्रमुद्देश्यं भवति बालानां शिक्षणम् । वातावरणे उत्तेजना: भवन्ति। एता: उत्तेजना: प्रति बालानामनुक्रिया: प्रारम्भे स्वाभाविक्य: भवन्ति । अनुभवेन एतासु प्रतिक्रियासु परिवर्तनं परिमार्जनञ्च करोति । एतसु प्रतिक्रियासु संलग्नीभवनमेवाधिगमोऽस्ति । एता: परिक्रिया: प्रतिक्रिया: च समाजसम्मता भवन्ति । समाजसम्मतै: व्यवहारै: एव आत्मानं समायोजयति । एवमेव सामाजिक - समायोजनस्य क्रिया एवाधिगमस्य प्रक्रियाऽस्ति ।

विद्यालयानामुद्देश्यं बालकानां व्यवहारे इष्टपरिवर्तनं भवति । बालकानां कृते अधिगमानुभवस्यावश्यकता भवति । अत: विद्यालयानां कार्यमधिगमप्रक्रियार्थमनुभवप्रदानस्य व्यवस्थाकरणं भवति । एतेऽनुभवा: विद्यालयस्यान्तरिकबाह्यवातावरणसम्बन्धिन: भवन्ति । अनेनैव आधुनिकविचारधारानुसारेण पाठ्यचर्यायाः (curriculum) अर्थ: विद्यार्थिनां तेषां सर्वेषामनुभवानां सङ्घटनमस्ति ये विद्यालयस्य निर्देशनं प्राप्नुवन्ति । अनया विवेचनया स्पष्टं भवति यत् अधिगमस्यार्थ: अनुभवेन व्यवहारपरिवर्तनमस्ति ।

**अधिगमस्य सोपानानि (Steps of Learning)**

**अभिप्रेरणम् (Motivation):**

मनुष्यस्य नैका आवश्यकता: भवन्ति । एतासु काश्चन तस्य जीवनमरणयो: जातिजीवनयो: सुरक्षाया: आत्मसम्मानस्य वा प्रश्न: भवति । एतेषां पूर्त्यर्थं तस्मिन् प्रेरक: उत्पद्यते । तत: स:

अतिक्रियाशीलो भवति । अप्रेरिते मनुष्ये प्रयोजनं भवति,तेन स:उत्प्रेरितो भूत्वा क्रियां व्यवहारं वा सम्पादयितुं बाध्य: भवति ।

**उद्देश्यम् (Goal) :**

मानव: व्यवहारं निष्प्रयोजनेन न करोति,अपि तु स आवश्यकतावशेनैव व्यवहारं करोति । अत एव उक्तमस्ति –"प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते " इति । आवश्यकतापूर्त्यर्थमेव तस्य व्यवहार: एकं सुनिश्चितमुद्देश्यं प्रति अभिमुखो भवति । इदमेव मनोवैज्ञानिकशब्देषु कथयितुं शक्नुम: यत् व्यवहारो सदैव प्रयोजनपूर्णं भवति । अधिगमप्रक्रियायामुद्देश्यनिर्धारणमेकं मुख्यसोपानमस्ति । उद्देश्यनिर्धारणानन्तरं व्यवहारस्य दिशा स्पष्टा निश्चिता च भवति ।

**अवरोध:(Obstacle) :**

उद्देश्यपूर्तौ अवरोधस्य आगमनमधिगमप्रक्रियाया: मुख्यसोपानत्वं भजते । यदि अवरोधस्योपस्थिति: न स्यात् तर्हि मानवेन स्वपूर्वव्यवहारेण कार्यं कर्तुं शक्यते । पूर्वव्यवहारेण कस्यचित् कार्यसम्पादने कोऽपि नूतनानुभव: न प्राप्यते । अथ च अनेन कमपि नूतनव्यवहारशिक्षणस्यावसरोऽपि न प्राप्यते । अवरोधस्य उपस्थितित्वात् मानव: नैकान् नूतनव्यवहारान् करोति, तेनोपयुक्तव्यवहार: तस्य मनस्यागच्छति ।

**विविधसम्भावितानुक्रिया: ( Various Exploratory Responses) :**

बाधां पारङ्कृत्वा उद्देश्यं यावत् गमनार्थं मानव:नैका: सम्भाविता: अनुक्रिया: करोति । अत: इदमपि अधिगमस्य मुख्यसोपानमस्ति ।

**सबलीकरणम् (Reinforcement) :**

नैकासु सम्भावितक्रियासु ययोपयुक्तया क्रिययोद्देश्यपूर्तिर्भवति,या वा अनुक्रिया संतोषजनिका सुखप्रदा च भवति सा सबलीकृता भवति । अन्या: सर्वा: असफला: अनुक्रिया: मानव: विस्मरति, सफलां च क्रियां तया परिस्थित्या सह युद्धाय चिनोति । भविष्ये तस्यामेव परिस्थितौ पुनरावश्यकतायां सत्यां सः तस्याः पुनरावृत्तिं करोति । अधिगमप्रक्रियायां सबलीकरणस्य सोपानमपि मुख्यतत्वं भवति ।

**सङ्घटनं वा सामान्यीकरणम् (Integration or generalization) :**

अस्मिन् अन्तिमे सोपाने मानव: नवीनाया: सफलानुक्रियाया: पूर्वज्ञानक्रियया सह समन्वयं स्थापयति । इदमेव नवीनज्ञानेन सह पूर्वज्ञानस्य सामञ्जस्यमपि कथ्यते । अनेन सोपानेन नवीनानुक्रिया तस्य ज्ञानस्य अङ्गत्वं भजते । तस्या: सम्पूर्णज्ञानेन सह एकीकरणं भवति ।

**********

# जीवने शिक्षणम्

गिरीशभट्टः

शिक्षाशास्त्री प्रथमवर्षम्

अनुक्रमाङ्कः – 828

शिक्षणमस्माकं जीवने एकम् अविभाज्यम् अङ्गम् इव स्वीयं पात्रं निर्वहति। यथा पितृभ्यां पुत्रः , पुरुषेभ्यः उद्योगः , वाहनेभ्यः इन्धनं यथा अवश्यं भवति तथैव जीवनाय शिक्षणम् अत्यावश्यं वर्तते। **"जीव प्राणधारणे"** इति धातोः भावार्थे ल्युट् प्रत्यये जीवनमिति रूपं भवति। तथैव **" शिक्ष विद्योपादाने "** इति धातोः भावार्थे ल्युट् प्रत्यये शिक्षणमिति रूपं भवति। भूमौ विद्यमानेभ्यः सर्वेभ्यः मानवेभ्यः शिक्षणम् आवश्यकमेव। परन्तु तत् शिक्षणं केवलं विद्यालयसीमितः न स्यात्।

किमिदं जीवनं इत्यत्र **" यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते "** इति हठयोगप्रदीपिकायाम् उक्तं वर्तते। शिक्षणमित्युक्ते तदेकम् आजीवनं यावत् प्रचलन्ती एका प्रक्रिया भवति। यावत् प्राप्नुमः तावत् वर्धते , यावत् दद्मः तावद्वर्धते। समाप्तिः एव न जायमानं अक्षयपात्रं भवति शिक्षणम्। चिन्तितं चिन्तनं साक्षात्करोति कामधेनुवत्। शिक्षणमथवा विद्या समाजे सर्वं पात्रं स्वयमेव निर्वहति तद्यथा –

**" मातेव रक्षति पितेव हिते नियुङ्क्ते**
**कान्तेव चापि रमयत्यपनीय खेदम्।**
**लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं**
**किं किं न साधयति कल्पलतेव विद्या ॥"** इति।

समाजे शिक्षणं बहुमुख्यं भवति तद्यथा कन्नडे एका उक्तिरस्ति – **" विद्ये इल्लदवनु गद्दिगिंतलू कडे ( ವಿದ್ಯೆ ಇಲ್ಲದವನು ಹದ್ದಿಗಿಂತಲೂ ಕಡೆ ) "** इति। अर्थात् यस्य जीवने शिक्षणं नास्ति सः पशोः अपेक्षया अपि न्यूनतां याति , विद्यारहितः गृध्रापेक्षयापि नूनो भवति इति तात्पर्यम्। बहूनां जनानां मनसि एका मिथ्या कल्पना वर्तते यथा शिक्षणं नाम केवलं विद्यालयमात्रे दीयमानमिति। पुत्राः विद्यालयं प्रेष्यन्ते चेत् ते विद्यावन्तः इति। परन्तु एषा कल्पना एव , न तु सत्यम्। केवलं विद्यालयशिक्षणमेव शिक्षणं नास्ति।

जीवने सम्यक् अवलोक्यते चेत् जन्म आरभ्य मरणपर्यन्तं प्रतिक्षणं बहुषु विधेषु रूपेषु च वयं शिक्षणं प्राप्नुमः। केवलं मानवेनैव न प्राणिपक्षिकीटैरपि वयं शिक्षणं प्राप्नुमः। प्राप्तजन्मा बालकः काले गते विद्यालयेन विनापि भाषाम् अधीते व्याकरणज्ञानेन विनापि स्पष्टं मातृभाषां भाषते केवलं श्रवणेन। उपदेशेन विनापि मातापित्रोः आदारादि भावान् प्रकटयति बालकः। यां काश्चिदेकां

पिपीलिकां दृष्ट्वा अपि अनुसरणनियमं ज्ञातुं शक्नुमः । सर्पः किमपि आश्रयं विनापि निरायासेन जीवति । काकं सर्वे दूषयन्ति तथापि काकः प्राप्तं लघुम् आहारकणमपि इतरान् आहूय मिलित्वा खादति । तादृशं सहजीवनस्य गुणं काकेन प्राप्नुमः । आश्रयदातृभ्यः शुनकः कथं निष्ठावान् भवति इति निष्ठागुणं शुनकेन प्राप्नुमः । पुत्रान् सर्वदा स्वस्य उदरे एव स्वीकृत्य नयति वानरः तस्मात् पुत्रवात्सल्यं ज्ञास्यामः । सिंहः व्याघ्रः वा महती बुभुक्षा अस्ति चेदपि स्वस्य आहारं स्वयमेव मृगया अन्विषतीति अनेन ज्ञास्यामः स्वाभिमानं कथं स्यादिति ।

सस्याः वृक्षाश्च महतः कष्टस्य सत्वेऽपि कथं धैर्येण तस्य परिहारः करणीयः इति चिन्तयन्ति । एतादृशं शिक्षणं केवलम् औपचारिकविद्यालयमात्रेण प्राप्तुं न शक्नुमः कदापि । शिक्षणमेतादृशं औपचारिकनिरौपचारिकरीत्या एव ज्ञातव्यं भवति ।

शिक्षणस्यास्य प्रधानम् उद्देश्यमस्ति यत् व्यक्तेः सर्वतोमुखविकासः अभिवृद्धिश्च । परन्तु अद्यतनशिक्षणं व्यक्तेः सर्वतोमुखविकासाय न सहकरोति । केवलं उद्योगाय धनार्जनाय च इति इदानीन्तनकालः । छात्राः पाठ्यपुस्तकानि पठन्ति चेदपि तेषां ज्ञानं पुस्तकपरिमितमेव अद्यतनकाले दृश्यते । अनेके छात्राः अध्ययने अग्रेसराः सन्ति चेदपि सामान्यव्यवहारेषु अप्राप्ताः एव तिष्ठन्ति । सामाजिकज्ञानं तेषाम् ईषदपि न भवति ।

एतादृशस्थितेः कारणं न केवलं विद्यालयः , शिक्षणपद्धतिः अपि तु पितृभ्यां पुत्रेषु अन्धप्रीतिरपि कारणम् । बालाः प्रौढाश्चेदपि ते बालाः एव इति मत्त्व तेभ्यः किमपि दायित्वं न दीयते अभिभावकैः । एवं जातं चेत् तेभ्यः बालेभ्यः जीवनानुभवः एव न भवति । जीवननिर्वहणे अशक्ताः सन् क्लेशान् अनुभवन्ति ।

नेल्सन् मण्डेला महोदयः शिक्षणस्य महत्त्वम् इत्थं ब्रवीति यत् – **“ Education is the most powerful weapon , which you can use to change the world ”** । अर्थात् शिक्षणं एकं शक्तियुक्तम् आयुधं वर्तते येन जगतः परिवर्तनं कर्तुं शक्यते इति । एवमेव ओप्रा विन्फ्रे महोदयः वदति यत् **“ शिक्षणं स्वातन्त्रस्य कुञ्चिका इव वर्तते ”** इति । तादृशस्य शिक्षणस्य अध्ययनम् अध्यापनं च अस्माकं कर्तव्यं वर्तते । शिक्षणस्य आन्त्यम् इति कदापि न भवत्येव तत् सीमातीतं कालातीतञ्च सत् आजीवनं तिष्ठति । कोऽपि समाजे सर्वज्ञः नास्ति । ज्येष्ठाः कनिष्ठैः , कनिष्ठाः ज्येष्ठैः वा अध्ययनं कुर्वन्ति । तत्र वयोभेदः नास्त्येव । अतः वयं सर्वेऽपि समाजे विद्यामानमुत्तमं शिक्षणं प्राप्य सर्वतोमुखदृष्ट्या विद्यावन्तः भवामः ।

**********

# मानवान्तर्गत-अचेतनाशक्तिः

**(Subconscious Mind Inside Humans)**

श्रीशसमीरः के. एस्
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 829

मानवस्य मनसि द्विप्रकारकक्रिये निवसतः। तत्र एकप्रकारिका क्रिया बाह्यजगति प्रचलिष्यमानेषु विषयेषु सम्बन्धिता सर्जनात्मिका पुनर्बलनयोग्या भवति यस्याः **चेतनाशक्तिः** इति नाम वर्तते। अन्यत् अस्ति **अचेतनाशक्तिः** यत्मनसः संवेगादिषु कार्यं करोति तथैव चेतनाशक्तेः अभावक्षणे अत्यधिकं प्रभावात्मकं कार्यादिकं सम्पादयितुं शक्नोति। द्विपथी-मनसः उपकरणद्वयानां नामान्तराणि विविधानि वर्तन्ते। यथा-

चेतना - अचेतना, जागृतमनः - अजागृतमनः, विषयाधारितः(objective) - सांवित्तिकः(subjective), तलस्थरः - गहनस्थरः, नियमितमनः - अनियमितमनः इत्यादीनि।

चेतनाशक्तेः कार्यम् अधिकतरं संदर्शने(observation), अनुभवे(experience), शिक्षणे(education) च आधारभूतं भवति। तस्य मुख्योद्देश्यं भवति कारणसम्पादनम् (Reasoning)। यथा- नगरे विद्यमानानाम् आपणानां, पुष्पवनानां, भवनानां, विशेषस्थानानां वीक्षणेन नगरस्योपरि सुन्दरं या अन्याभिप्रायान् सन्दर्शनानुभवशिक्षणानामाधारेण निश्चिनोति मनः।

अचेतनाशक्तिः चेतनाशक्तेः अनुपस्थितौ यथा निद्रायां, योगनिद्रायां, ध्यानावस्थायाञ्च जागृतं भवति, यच्चक्षुर्विना एव पश्यति, बाह्येन्द्रियानामसहाय्येनैव कार्यान्सम्पादयति। मनसः देहात् निर्गमनं कारयति, दूरस्थप्रदेशेषु अटति, बुद्धेः तीक्ष्णताम् उपयुज्य मानवजीवने आपतितानां प्रत्येकक्रियाकलापनां सूक्ष्मरूपेण अध्ययनं करोति। परिसरे विद्यमानानां अन्येषामपि भावनानां अथवा संवेगानां परिवीक्षणमपि बाह्येन्द्रियाणामसाहाय्येनैव सम्पादयितुं समर्थः अस्ति।

मनसि अचेतनाशक्तिः मृदिव भवति यत्किमपि बीजम् आरोपयतु सूक्तपोषणेन फलं ददात्येव। अचेतनाशक्तिः मानवेप्सितकर्मणां फलस्वरूपेण निश्चितसमयेषु वृत्यनुभवघटनादीनां माध्यमेन संसारे क्रियाशीलं भवति। यत्मानवः सत्यान्वेषणे प्रतीतिसमीक्षाणामाधारेण चिन्तयति तत्सत्यस्य परिभाषां रूपयितुमेतत् अचेतनमनः कार्यं करोति। उदाह्रियते यथा- कोऽपि एकः पुरुषः कदलीफलं नेच्छति, परन्तु सार्वजनिककार्यक्रमे पराग्रहात् खादितुं प्रवृत्तःभवति। खादनानन्तरं तत्फलकारणात् उदरे पीडनमपि अनुभवति ।यतोऽहि कदलीफलखादनं तस्य पुरुषस्य कृते अनीप्सितकर्म इति मनसि निर्धारितं सत्यमस्ति। अस्य सत्यस्य प्रमाणनार्थं कार्यं कुर्वन् अचेतनमनः

कदलीफलेन जायमानं दुष्प्रभावं प्रकटयति। अन्यदेकमुदाहरणं पश्यामः- एकस्याः महिलायाः मनसि शोधितं सत्यं वर्तते यत् रात्रौ काफीपानेन निद्रा नागच्छतीति। अतः अचेतनमनः तस्याः देहे जायमानानां पैत्तिकरासायनिकानां कार्यान्वयनं करोति। अतः निद्रायाः अवरोधः भवति। अत्र परिज्ञातव्यः विषयः अस्ति यत् काफीपानेन सर्वेषां देहेषु पैत्तिकांशानां सक्रियता भवत्येव। अत्र अचेतनमनः केवलं तस्य पैत्तिकप्रभावस्य अर्थात् अनिद्रायाः प्रकाशनं करोति। संवेगात्मकं अथवा अनुभवात्मकं यदपि भवतु तत्साक्षादङ्गीक्रियते अचेतनमनसा।

अचेतनमनः यस्य सम्यक् कार्यं करोति तस्य भौतिकसाधनानाम् आवश्यकता अधिकं न भवति। यथा प्रातःकाले उत्थापनार्थमपि अलराम (alarm) इति भौतिकसाधनस्य उपयोगं कुर्वन्ति तत् अनावश्यकमिति, अस्मिन्समये उत्थातव्यमिति अचेतनमनसि दृढीकरणेन प्रातः निर्दिष्टसमये उत्थानं भवति। अतः एव प्राचीनाः दार्शनिकाश्च (अधिकाःपौरस्त्याः) भौतिकसाधनानाम् आविष्करणापेक्षया अन्तर्निहितशक्तीनामध्ययने अत्यधिकप्रबलतां प्रदर्शितवन्तः। जगति अचेतनाशक्तेः सहाय्येन बहवः साधकाः यथा एडिसन् (Edison), फोर्ड् (Ford), मार्कोनि (Marconi), ऐन्स्टेन् (Einstein) इत्यादयः सञ्जाताः। अचेतनमनः सर्वेषु मानवेषु प्राकृतिकरूपेण तिष्ठत्येव। चेतनाशक्तेः भौतिकसाधनानां विषये भावितस्य मनसः विश्रान्तिप्रदानेन तथैव अन्तर्निहितानां संवेगादिभावानां समतोलनं कृत्वा केन्द्रीकरणेन अचेतनाशक्तेः विकसनं सम्भवति। केचन वदन्ति यत् शारीरिकक्लेशानाम् उपेक्षया तूष्णीरूपधारणेन शरीरस्य **प्रतिरोधः** (resistance) इत्यस्य साक्षात्कारः भवति। अचेतनाशक्तेः कोऽपि वैयक्तिकानुबन्धः न भवति। एतत् विश्वव्यापिशक्तिः वर्तते यस्याः सदुपयोगः तथैव दुरुपयोगोऽपि कर्तुं शक्यते ।

आधुनिकजगति विना प्रमाणेन तत्त्वानाम् अनुमोदनम् अवैज्ञानिकं भवति। परन्तु अचेतनाशक्तेः प्रभावं केवलं प्रमाणीकरणसीमायाः परिक्षेपे द्रष्टुं न शक्नुमः । अचेतनाशक्तेः निर्दिष्टसीमा नास्ति, संवेगानामनुभवानाञ्चाधारेण मनसः क्षेत्रं विस्तृतं भवति। बहवैः पौरस्त्यैः (eastern countrymen) जीवने जायमानानां शारीरिकमानसिकक्लेशानां **प्रशमन/अपनयनप्रक्रियाद्वारा** (Healing method) उपचारं कृतम्। अस्याः प्रक्रियायाः माध्यमेन अचेतनमनसः नियन्त्रणं विश्रमित परिस्थितौ निवेशनेन सिध्यति। प्रशमनप्रक्रियायां मनसः शिथिलीकरणकार्यं सम्भवति। प्रथमतः सूक्तासनेषु उपविश्य, शरीराङ्गानां शिथिलदिशि संन्यस्य, निद्रालस्यस्थितौ मनः संप्रेष्य, सूक्ताभिवादनशीलं मनः प्राप्य, अचेतनाशक्तेः अन्तप्रवेशः भवतीति चिन्तनकरणमेव प्रथमसोपानं भवति। द्वितीयसोपानमस्ति यत् निद्रावस्थायां मनसि शान्तिसन्देशः पूर्णविश्वासेन उत्पादनीयः यथा **"अहं क्लेशात् बहिरस्मि। मम कोऽपि क्लेशः नास्ति। मम मनसि**

**स्थिर शान्तिः निवसति।"** इति। पञ्चनिमिषपर्यन्तम् एषा प्रक्रिया अनुसर्तव्या। तृतीयसोपानं भवति यत् केनापि अन्येन भवतां समक्षे आगत्य **"क्लेशात् मुक्तः भवान्"** इति कथयन्निव भावः अथवा रूपकं मनसि निर्मातव्यः। एवं प्रकारेण धन्यवादप्रदानेन सम्पूर्णमुक्तभावाः मनसि उद्भवन्ति। चेतनावस्थायां सांवित्तिकप्रक्रियातः उत्पादितज्ञानस्याधारेण अचेतनमनसि नियन्त्रणप्रापणमेव अचेतनाशक्तेः सुदिशायां प्रवर्तनं भवति।

एषा प्रक्रिया आधुनिकरीत्या अचेतनाशक्तेः जगति निरूपणाय प्रसिद्धा अस्ति। अस्याः अचेतनाशक्तेः विषये अब्रहममास्लोव् महोदयेन (Abraham Maslow) स्वस्य पराव्यक्तिकमनोसिद्धान्ते (Transpersonal psychology) तथैव मानववादीसिद्धान्ते (Humanistic approach) च निरूपितमस्ति। अस्माकं नैजशक्तिः अचेतनमनस्येव सम्यक् अधिवसति। अस्याः शक्तेः सम्पूर्णज्ञानं सम्पादयितुम् असम्भवमेव यतो हि अस्य परिक्षेपता विस्तृतमस्ति। सूक्तसमये निर्दिष्टविषये अचेतनायाः उपरि अभ्यर्थनेन सा सूक्तक्रियान् प्रददाति | स्वमनसि धनात्मकरीत्या अचेतनाशक्तिविषये विश्वासस्य वृद्धिं कुर्यात्। एवं प्रकारेण मनसि अचेतनाशक्तेः सम्यक् नियन्त्रणेन असामान्यशक्तीनां उत्पत्तिः भवति तथैव सा शक्तिः निर्दिष्टलक्ष्याणां पूरणार्थं साहाय्यमाचरति।

डा. जोसेफ् मर्फि महोदयेन लिखितं "The miracles of subconscious mind" इति पुस्तकेन समधीतम्।

**********

## महाभारतानुसारं शैक्षिक विचाराः

भुवनचन्द्र जोशी
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 832

अल्पज्ञानं भीषणं भवति अस्योदाहरणं महाभारते अभिमन्यु आसीत् । यद्यप्युभिमन्युः वीरयोद्धासीत् । तस्य मृत्युः यस्यां परिस्थितौ जाता वर्तते तस्यां परिस्थितौ तस्य पार्श्वे चक्रव्यूहस्य पूर्णज्ञानं नासीत् । अत एव ज्ञायते यत् कष्टसमये अल्पज्ञानं कस्यापि विषयस्य ज्ञानं पूर्णरूपेण भवेदिति । महाभारते एतादृशाः बहवः जनाः आसन् ये स्वीयसेनां त्यक्त्वा अपरसेनां प्रति गतवन्तः, उदाहरणार्थं शल्यः ,युयुत्सुः , इत्यादि दृश्यन्ते अत एव उक्तं वर्तते चाणक्यनीतौ -

**न विश्वसेत् कुमित्रे च मित्रे चापि न विश्वसेत् ।**
**कदाचित् कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत् ।।**

अत एव कदापि कुमित्रस्योपरि विश्वासः न करणीयः ।

शस्त्रेणाप्यत्यधिकं घातकं भवति वचनम् । इमां वार्तां सर्वे जानन्त्येव यत् केनापि कस्यापि कृते दत्तं कुवचनं राष्ट्राय,समाजाय परिवाराय च कष्टप्रदायकं भवति। तस्य उदाहरणं महाभारते द्रौपद्या: मुखात् निस्सृतं वचनम् आसीत् । येन ज्ञायते यत् कदापि कस्या: अपि व्यक्ते: निन्दा न करणीया अत एव उक्त: वर्तते भगवता कृष्णेन-

**अंहिसा सत्यमक्रोधस्त्याग: शान्तिरपैशुनम्।**

**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।** (१६अ.सं२)

मनसा वाचा कर्मणा शरीरेण कस्यापि कृते कष्टं न दातव्यम् । यथार्थरूपेण प्रियभाषणं कुर्यु: यदि कोऽपि कस्यापि अपकारं करोति तस्मिन् कुद्धः न भवेत् । सदा कर्तु : अभिमानस्य त्याग:, अत एव कदापि कस्या:अपि व्यक्ते: अपमानं न कर्तव्यमिति शिक्षाया: उद्देश्यं वर्तते ।

अहंकारदर्पौ पतनस्य कारणं भवति महाभारते दुर्योधनं राज्यस्य कृते बह्वाभिमान: आसीत् एवञ्च पाण्डवानां कृते एकमपि ग्रामं न दत्तवान् । एतदेव लोभस्य कारणमपि भवति, अत एव अस्माकं कर्तव्यं वर्तते, यत्कदापि अहङ्कारदर्पौ न करणीयौ ।

भगवता कृष्णेनोक्तम् -

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मन:।**

**काम क्रोध: तथा लोभ तस्मादेतत्त्रयं त्यजेत् ।।(16/21भ.)**

**शिक्षायोग्यताभ्यां निपुण:**

व्यक्ते: जीवने ताभि: प्राप्ता शिक्षा तथा च तस्या: कार्यं योग्यता एव सफलार्थम् आगच्छति । यदि वयं कार्यं प्रति जागरूका: भवाम: चेत् तदा कोऽपि अस्मान् न तर्जयति, अस्योदाहरणं महाभारते एकलव्य: आसीत् । तेन किं कृतं स्वगुरो: मूर्तिनिर्माणं कृत्वा निष्ठापूर्वकं धनुर्भ्यास: कृत: तदर्थं सः सफलो अभवत् । अत एव उक्तं वर्तते-

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**

**असदित्युच्यते पार्थ न तत्प्रेत्य नो इह।।(भ17/28)**

अत एव अस्माभि: सदा निष्ठापूर्वकं सेवा कर्तव्या इति।

**********

# मन्त्रलक्षणम्

प्रदीपभट्ट के.

शिक्षाशास्त्री प्रथमवर्षम्

अनुक्रमाङ्कः – 833

इह खलु परमकारुणिकेन भगवता जैमिनि ऋषिणा "**अथातो धर्मजिज्ञासा**" इत्यादिना द्वादशसु अध्यायेषु धर्म एव विचारितः। अत्र अथशब्दस्य वेदाध्ययनानन्तरम् इत्यर्थः। अतः शब्दो हि वेदाध्ययनस्य दृष्टार्थत्वं ब्रूते। एवं च विवक्षिते सति वेदार्थे पुरुषस्य यत्र यत्र सन्देहः स सर्वोऽपि विचारशास्त्रस्य विषयः तन्निर्णयश्च प्रयोजनम् इति कृत्वा प्रकृते '**मन्त्रलक्षणम्**' अस्त्युत न इति सन्देहं प्रकटीकृत्य निर्णयं क्रियते शास्त्रेऽस्मिन्।

मन्त्राणां तु प्रयोगसमवेतार्थस्मारकतया अर्थवत्वम्। प्रयोगः अनुष्ठानम्, तत्र समवेताः सम्बद्धाः अर्थाः द्रव्यदेवतादयः तेषां ये स्मारकाः ते मन्त्राः इति यावत् इति जैमिनीयन्यायमादाय प्रथमाध्याये द्वितीये पादे चतुर्थाधिकरणे निरूपितम्। "**उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्**" इत्ययं कश्चिन्मन्त्रः। तस्य मन्त्रस्य अयमर्थः- '**भो पुरोडाश! त्वमुरु विपुलता यथा भवति तथा प्रसर**' इति। एवमादयो मन्त्राः यागप्रयोगेषु उच्चार्यमाणा अदृष्टमेव जनयन्ति न तु अर्थप्रकाशनाय तदुच्चारणम्। पुरोडाशप्रथनलक्शणस्यार्थस्य ब्राह्मणवाक्येनापि भासमानत्वात्। "**उरु प्रथस्वेति पुरोडाशं प्रथयति**" इति ब्राह्मणवाक्यं विद्यते। अतः तेनैव ब्राह्मणवाक्येन अर्थप्रकाशनं वा अर्थस्मारकत्वं वा भवतु इत्याक्षेपः पूर्वपक्षिणाम्।

न। अर्थप्रत्यायनस्य दृष्टप्रयोजनस्य सम्भवे सति केवलमदृष्टं कल्पयितुमशक्यत्वात्। तदेवोक्तम्-

**"लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना।**
**विधेस्तु नियमार्थत्वात् नानर्थक्यं भविष्यति॥"**

अर्थात् '**दृष्टे सम्भवति अदृष्टस्य कल्पना अन्याय्या**' इति न्यायेन केवलादृष्टस्य कल्पयितुमशक्यत्वात्। तस्मात् दृष्टमर्थानुस्मरणमेव यागप्रयोगे मन्त्रोच्चारणस्य प्रयोजनम्। तर्हि ब्राह्मणवाक्येनापि अर्थानुस्मरणसम्भवे '**मन्त्रैरेवानुस्मरणीयम्**' इति यो नियमः तस्य दृष्टासम्भवात् अदृष्टमेव प्रयोजनमस्तु इति सिद्धान्तः।

**********

# अध्यापकोत्तमः

राजेश आर्. एस्.
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 834

अस्माकं विद्यार्थिजीवने बहूनाम् अध्यापकानाम् अध्यापनं वयं प्राप्तवन्तः। किन्तु तेषु बहूनां पाठनं स्मृतिमण्डले भवत्येव । अत्र किञ्चित् ज्योतिषशास्त्रस्य अनुभवेन वा उदाहरणेन प्रदर्श्यते । अध्यापको नाम गुरुः । ज्योतिषशास्त्रे गुरुः नाम बृहस्पतिः । येषां जातके बृहस्पतिः प्रबलः वर्तते तेषां पाठनन्तु आनन्ददायकं स्मरणयोग्यं च भवति । अर्थात् तेषां शारीरिकभाषा एव ग्राह्ययोग्या भवति ।

जातके बृहस्पतेः स्वक्षेत्रवर्गोत्तमनवांशादिप्रबलत्वं दृष्ट्वा अध्यापकत्वं वक्तुं शक्यते । अत्र केवलम् अध्यापकानां न अपि तु कञ्चन विषयं यः बोधयति उत पाठयति इत्यस्मात् तस्य विषयस्य अवगमनं शीघ्रतया स्पष्टतया वा भवति (अनुभवेन)। अत्र नैव संशयः ।

अधः जातकत्रयेण अनुभवस्य उदाहरणं ददामि....

**१. प्रो. ए. पि. सच्चिदानन्दः**

अस्मिन् जातके बृहस्पतिः वर्गोत्तमे वर्तते ।

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्य-
पर्यन्तगाः शुभफला नवभागसंज्ञाः ।
सिंहो वृषः प्रथमषष्ठहयाङ्गतौलि-
कुम्भस्त्रिकोणभवनानि भवन्ति सूर्यात् ॥ (बृ.जा.१/१४)



२. डा. हरिनारायण तिवारी

अस्मिन् जातके तु गृहचक्रे बृहस्पति: कर्कराशौ उच्चङ्गतः वर्तते। एवमेव नवांशके धनुषि वर्तते।




३. डा. गणेश ति. पण्डित:

अत्र राशिचक्रे गुरु: सिंहे वर्तते। किन्तु नवांशके तु बृहस्पति: उच्चङ्गतो वर्तते ।




**********

# बुद्धेः मापनं साधनानि

गुर्रे वेङ्कटशिवप्रसादः
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 838

भारते प्राचीनकालात् एव बुद्धेः परीक्षणं विस्तृतरूपेण कृतम् आसीत् । कस्याश्चित् व्यक्तेः अधिगमयोग्यता स्मृतिः तर्कशक्तिः कल्पनाशक्तिः इत्यादीनाम् आश्रयणेनैव बुद्धिस्वरूपस्य मापनं प्राचीनाः कुर्वन्ति स्म । बुद्धिः एका एतादृशी शक्तिः क्षमता वा वर्तते यस्याः मापनं प्रत्यक्षरूपेण न सम्भवति । अस्याः मापनं विभिन्नमानसिकप्रक्रियाणां क्षमतानां अथवा उपलब्धानां रूपेण क्रियते । बुद्धिपरीक्षणेन एव मानवीयव्यवहाराणां मापनं क्रियते ।

बुद्ध्युपलब्धिमाध्यमेन स्वसामान्यमानसिकयोग्यतायाः विशिष्टयोग्यतायाश्च विषये ज्ञानं भवति । बहूनि बुद्धिपरीक्षणानि संस्कृतस्य ग्रन्थेषु अपि दृश्यन्ते । तत्र यक्षयुधिष्ठिरसंवादः अस्मै बुद्धिपरीक्षणाय प्रमुखोदाहरणम् अस्ति । मनोवैज्ञानिकक्षेत्रे १८७९ तमे वर्षे वुण्ट् महोदयेन प्रथमतया मनोवैज्ञानिकप्रयोगशालायाः स्थापनेन एव बुद्धिमापनाख्यस्य कृते मनोवैज्ञानिकाधारः प्रदत्तमस्ति । परन्तु सर्वप्रथमं १९०५ तमे वर्षे बिनेमहोदयेन बुद्धिपरीक्षणस्य निर्माणं कृतम् । अस्मिन् परिक्षणे ३ वर्षतः १६ वर्षपर्यन्तं विद्यमानानां जनानां बुद्धेः मापनं भवति स्म । अस्य परीक्षणस्य १९०८ , १९११ तमे वर्षे संशोधनं जातम् । संशोधितस्वरूपं स्टेन फोर्डविने परीक्षणम् असीत् । १९५५ वर्षं यावत् भारतीयभाषासु बुद्धिपरीक्षणानां निर्माणं सञ्जातम् ।

**बुद्धिपरीक्षणानां भेदः –**

१. वैयक्तिकबुद्धिपरीक्षणानि

२. सामूहिकबुद्धिपरीक्षणानि

३. निष्पादनपरीक्षणानि

**बुद्ध्युपलब्धिः**

१९०८ तमे वर्षे वुण्ट् महोदयेन सर्वप्रथमं मनसः आयु विषये चिन्तनं कृतम् । बिनेमहोदयानुसारं मानसिकायुः इत्यस्याभिप्रायः बुद्धिपरीक्षणेन मानसिकपरीक्षणेन वा प्राप्तपरिणामानां फलितांशः एव वर्तते । बुद्धिलब्धिः बालकस्य व्यक्तेः वा सामान्ययोग्यतायाः विकासस्य गतिं सूचयति । बुद्धिलब्धेः सूत्रम् एवं वर्तते –

बुद्धिलब्धिः = मानसिकायुः ÷ वास्तविकायुः × 100

( IQ = MENTAL ÷ REAL AGE × 100 )

Terman महोदयेन बुद्धिलब्धेः आधारेण निम्नप्रकारेण एव बालकानां विभागः कृताः

| बुद्धिलब्धिः | बुद्धेः भेदः |
| --- | --- |
| 1 तः 25 | जडः ( Idiot ) |
| 25 तः 50 | मूढः ( Imbeeile ) |
| 50 तः 70 | क्षीणबुद्धिः ( Muron ) |
| 70 तः 80 | दुर्बलबुद्धिः ( Feeble Minded) |
| 80 तः 90 | मन्दबुद्धिः ( Backword ) |
| 90 तः 110 | सामान्यबुद्धिः ( Average ) |
| 110 तः 120 | उत्कृष्टबुद्धिः ( Superior ) |
| 120 तः 140 | अत्युत्कृष्टबुद्धिः ( Very S.P ) |
| 140 तः अधिकः | प्रतिभावान् ( V.V.S.P. ) |

**********

## पियाजे-महोदयस्य संज्ञानात्मकविकासः

हरिश चन्द्र दासः
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 848

मानावानां विकासस्य अध्ययनं मनोविज्ञानस्य महत्त्वपूर्णमङ्गं वर्तते। कुशलः अध्यापकः बालकानां – मानसिकविकासावस्थाः, तासां विशेषतानां विषये अवश्यं जानीयात् । एतेन सः शिक्षाक्षेत्रे विभिन्नकार्याणां योजानानाञ्च कार्यान्वियनं समर्थतया कर्तुमर्हति । अभिवृद्धि-विकासयोः प्रक्रिया व्यक्तेः गर्भाधानात् मरणपर्यन्तं निरन्तरं प्रचलति । तत्र विविधावस्थाः सन्ति। सामान्यतः अभिवद्धि-विकासशब्दयोः प्रयोगः पर्यायत्वेन क्रियते। परन्तु तत्र परिमाणात्मकपरिवर्तनम् अभिवृद्धिः इति, गुणात्मकपरिवर्तनं विकासः इति सामान्यतः वक्तुं शक्यते ।

**विकासस्य अर्थः**(Meaning of Development)–

व्यक्तौ जायमानानि समस्तपरिवर्तनानि विकासः इति वक्तुं शक्यते । अत्र शारीरिक-मानसिक-सामाजिक-सांवेगिक-संज्ञानात्मक-नैतिकपरिवर्तनादीनि अन्तर्भवन्ति । अतः अभिवृद्धेः अपेक्षया विकासः इति भावः व्यापकः वर्तते । अभिवृद्धिस्तु विकासस्य एकमङ्गं वर्तते । शरीरस्य

विभिन्नसंरचनानां तथा कार्याणां संगठनात्मिका संकीर्णप्रक्रियैव विकासः इति वक्तुं शक्यते । अतः विकासस्य विविधपक्षाणां मापनं मूल्याङ्कनञ्च कठिणतरं भवति । विकासः शारीरिकपरिवर्तनानि, तैः उत्पन्नमनोवैज्ञानिकप्रक्रियाणां मध्ये समन्वयं संपाद्य व्यक्तौ नूतनसामर्थ्यानां विकासं करोति ।

**विकासस्य अवस्थाः**

विकासः काचित् सततप्रक्रिया वर्तते या जन्मतः मृत्युपर्यन्तं निरन्तरं प्रचलति । परन्तु मनोविज्ञानस्य व्यावहारिकतया मनुष्याणां स्वभावं ज्ञातुं विभिन्नावस्थासु विभागः कृतः। विभिन्नावस्थासु व्यक्तेः शारीरिक-मानसिक-सामाजिक-सांवेगिक-नैतिकविकासाः कथं भवन्तीत्यध्ययनं क्रियते । अध्यापकाः विद्यालयीयच्छात्राणां व्यवहारमवगन्तुं विभिन्नावस्थासु तेषां विकासक्रमं जानीयुः येन कक्ष्याप्रकोष्टे शिक्षिणाधिगमकार्याणामायोजनं सञ्चालनञ्च समर्थतया कर्तुं शक्यते। सामान्यतः विकासस्य चतस्रः अवस्थाः सन्ति । ता यथा-

1. शैशवावस्था- जन्मतः 5 वर्षपर्यन्तम् ।
2. बाल्यावस्था – 5 तः 12 वर्षपवर्यन्तम् ।
3. किशोरावस्था- 12 तः 18 वर्षपर्यन्तम्।
4. प्रौढावस्था – 19 तः अधिकः ।

**विकासस्य सिद्धान्ताः -**

पियाजेमहोदयस्य संज्ञानात्मकविकाससिद्धान्तः

लॉरेन्स कोह्लबर्गमहोदयस्य नैतिक विकासः

वाइगोत्स्कीमहोदयस्य सामाजिकविकाससिद्धान्तः

अभिवृद्धिविकासयोः बहवः सिद्धान्ताः विद्यन्ते । तत्र पियाजेवर्यस्य कोहल्बर्गमहोदयस्य च सिद्धान्तौ प्रसिद्धौ स्तः। तयोः विषये संक्षिप्तया विवरीयते ।

**पियाजेमहोदयस्य संज्ञानात्मकविकाससिद्धान्तः** (The piaget’s Cognitive Developmental Theory) –

पियाजेमहोदयः जीवशास्त्रस्य अध्यापकः वर्तते । सः व्यक्तेः बुद्धिपरीक्षाणां विषये अध्ययनार्थम् अवसरं प्राप्तवान् । तदर्थं जीवशास्त्रस्य ज्ञानेन प्रयोगान् विधाय बुद्धेः विषये विशिष्टसिद्धान्तं प्रत्यपादयत् यदधुनापि विद्वद्भिः भूरि शंस्यते । सः विवाहात्परं पत्न्या सह तस्यापत्यानां बौद्धिकसामर्थ्यविकासस्य निरीक्षणं कृत्वा सिद्धान्तममुं प्रत्यपादयत् येन विकासात्माक- संज्ञानात्माक-बालमनोविज्ञानक्षेत्रेषु महद्योगदानं सञ्जातम् ।

**सिद्धान्तस्य प्राथमिकतत्वानि –**

बालके जन्मतः कानिचन सहजातानि भवन्ति। यथा- स्तन्यपानम्, चूषणम्, दर्शनम् इत्यादीनि । बालकः एतैरेव विविधानि कार्याणि निर्वहति । एतादृशकार्यकरणसामर्थ्यमेव सः schema इत्यभिवर्णयति। बालकस्य बौद्धिकविकासे स्कीमाभिः (by schemas) कानिचन संज्ञानात्मकपरिवर्तनानि जायन्ते। एताः स्कीमाः भौतिकसामाजिकपरिवेषे विभिन्नप्रेरकैः जीवः कथं प्रतिक्रियाः करोतीति निश्चिन्वन्ति । व्यक्तेः संज्ञानात्मकविकासः भौतिकसामाजिकपरिवेषेण सह विद्यमानां अन्तःक्रियां संयोजनञ्च आश्रित्य भवति। तादृशसंयोजनं साम्यम् , सन्धानम् इत्युभाभ्यां जायते। एते साम्यन्धानप्रक्रिये परिवेषेण सह सामञ्जस्यं संपादयितुं जीवाय सहकुरुतः । इमां समायोजनस्य प्रक्रियां पियाजेमहोदयस्य समतोलनम् इति व्यवहरन्ति । इत्थं पियाजे महोदयः व्यक्तेः संज्ञानात्मकविकासनिर्माणे एतेषां प्राधान्यतामङ्गीकरोति।

संज्ञानात्मकविकासस्य अवस्थाः

1. इन्दियजनितचालकावस्था (Sensory motor stage)
2. पूर्वक्रियावस्था (Pre-operational stage)
3. मूर्तक्रियात्मकावस्था (Concrete operational stage)
4. अमूर्तक्रियात्मकावस्था (Formal operational stage)

**इन्दियजनितचालकावस्था –** जन्मतः 2 वर्षर्यन्तम्।

इयमवस्था जन्मतः वर्षद्वयं यावत् भवति। बालकः भाषां न जानाति। अतः इन्द्रियजनितचालकक्रियाभिः एव परितः विद्यमानवातावरणम् अधिगच्छति । तद्यथा- नवजातशिशुः जन्मसमये काश्चन जैविकप्रतिक्रियाः करोति। यथा- स्तन्यपानम्, चूषणम्, दर्शनम्,ग्रहणम् इत्यादयः। ततः परं चतुर्षु मासेषु पूर्वोक्तजैविकप्रतिक्रियाणां मध्ये संयोजनं संभवति येन सः कानिचन कार्याणि कर्तुं सामान्यसामार्थ्यं प्राप्नोति । यथा- शिशुः सर्वाणि वस्तूनि मुखे संस्थाप्य चूषयितुं प्रयतते, किञ्चित् नूतनवस्तु दीर्घकालं यावत् पश्यति, नातिदूरे विद्यमानवस्तूनि प्राप्तुं प्रयत्नरतः भवति तथा हस्ताभ्यां ग्रहीतुं प्रयतते।

**पूर्वक्रियावस्था -** 2 वर्षतः 7 वर्षपर्यन्तम्

इयमवस्था द्वितीयवर्षात् सप्तमवर्षपर्यन्तं भवति । बालकः विभिन्नसङ्केतैः भावान् प्रकाशयति। अस्यामवस्थायां बालके भाषाविकासस्य आरम्भः भवति। अतः सः विभिन्नसंङ्केतैः भाषाभिः च वस्तूनां विषये स्वभावान् प्रकटयति।

**मूर्तक्रियात्मकावस्था – 7 वर्षतः 11 वर्षपर्यन्तम्**

अवस्थेयम् 7 वर्षात् 11 वर्षपर्यन्तं भवति । अस्यामवस्थायां बालकस्य संज्ञानात्मकसामर्थ्यानि विकसन्ति । बालके विभिन्नसंप्रत्ययानां निर्माणमस्यामवस्थायां संभवति । यथा- सः विभिन्नवस्तूनि अभिजानाति, तेषां वर्गीकरणं कर्तुं तथा योग्यनाम्ना तानि व्यवहरति । बालकः वस्तूनां मध्ये सम्बन्धं सामान्यताम् विभिन्नत्वञ्च अवगच्छति । क्रमशः वस्तूनाम् अमूर्तरूपाणि आश्रित्य चिन्तनाय प्रयतते।

**अमूर्तक्रियात्मकावस्था – 11 वर्षतः 15 वर्षपर्यन्तम्**

इयमवस्था 11 वर्षेभ्यः 15 वर्षाणि यावत् भवति। संज्ञानात्मकविकासस्य इयम् अत्युन्नतावस्था इति वक्तुं शक्यते । तद्यथा- बालकः चिन्तनम्, तर्कः, कल्पना, निरीक्षणम्, प्रयोगः इत्यादिकार्याणि स्वयं कर्तुं समर्थः भवति । बालकः भौतिक भौतिकप्रपञ्चे अविद्यमानवस्तुषु तत्त्वेषु च अभिरुचिं प्रदर्शयति । बालकः तथ्यानां सामान्यीकरणं, विश्लेषणं संश्लेषणञ्च कर्तुं शक्नोति ।

इत्थं पियाजेमहोदयस्य दृष्ट्या संज्ञानात्मकसामार्थ्यानां सर्वोत्तमविकासः अस्मिन् स्तरे संभवति। व्यक्तिः समस्याम् अवगम्य विश्लेषणं कृत्वा समस्यापरिष्कारे समर्थो भवति ।

**पियाजेसिद्धान्तस्य शिक्षाक्षेत्रे प्रयोगः –**

1. बालकस्य संज्ञानात्मकविकासमाश्रित्य शिक्षाक्षेत्रे पाठ्यक्रमस्य निर्माणं कर्तुं शक्यते ।
2. समाजस्य आवश्यकताः, बालकानां संज्ञानात्मकसामार्थ्यम् आश्रित्य योग्याधिगमानुभावानाम् आयोजनम् ।
3. विभिन्नावस्थासु बालानां चिन्तनविषये शिक्षकेभ्यः अभिभावकेभ्यश्च सामान्यज्ञानं प्रयच्छति ।
4. व्यक्तेः परिवेषे सामाञ्जस्यम् आश्रित्य, तया बुद्धिशक्तेः अवगमनम्।
5. कक्ष्याशिक्षणे सफलसंप्रेषणाय भाषया सह विविधसङ्केतानां प्रयोगस्य महत्वम् ।
6. शिक्षकः छात्रेभ्यः पाठक्रमे विद्यमानविषयाणां बोधनपेक्षया अन्वेषणाय प्रोत्साहनं कुर्यात् । तदर्थं शिक्षकः अन्वेषणाधिगमे छात्रेभ्यः विविधानुभवान् प्रापयितुं योग्यवातावरणस्य निर्माणं कुर्यात् ।

बालस्य संज्ञानात्मकसंरचनाम् अवलम्ब्य अधिगमानुभवानाम् आयोजनं करणीयम् । एतेन तस्य संज्ञानात्मकसामर्थ्यानां विकासः जायते। परन्तु सर्वेषाम् संज्ञानात्मकतथ्यानि समानानि न भवन्ति । इत्थं पियाजेमहोदयस्य बालकेन्द्रितशिक्षायाः आवश्यकतां प्रत्यपादयत् ।

**********

# समाजे विज्ञानं वरम् उत अभिशापः

दवे गौतमकुमारः
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 849

**विज्ञानस्य स्वरूपम् ---**

किं नाम "विज्ञानम्" कीदृक् वा अस्य स्वरूपम् ? कथङ्कारम् इदं जनानाम् अन्येषां चराचराणाञ्चोपकारं विदधाति ? विज्ञानेन के लाभाः काश्च हानयः ? मानवानां कथमिदं युगं विज्ञानयुगम् ? विज्ञानं विना किं मानवानां कार्यसञ्चालने अवरोधो उत्पद्यते, एते विचारणीयाः विषयाः अस्मिन् प्रसङ्गे सन्ति। समग्रं विश्वं वैज्ञानिकानां नवीनं – नवीनम् आविष्कारं विलोक्य आश्चर्यचकितमिव वर्तते। यथा--

**असम्भवं नाम न विद्यते क्वचित् किमप्यकार्यं न दृशि प्रतीयते।**
**दिने दिने साम्प्रतिके युगे असौ विज्ञानमहिमा नितरां विवर्ध्यते।।**

"विज्ञानम्" वैज्ञानिकविधीनां मूल्यानां कार्यक्रमाणां च प्रयोगं करोति। अवगमनं, भविष्यवर्जनं, नियन्त्रणं चेति त्रयः विज्ञानस्य गुणाः। एतेषां क्रमबद्धं पालनं यत्करोति तद् "विज्ञानम्" भवति। एवञ्च विचार्यमाणे रसायनं भौतिकं, गणितं इत्येतत्सर्वं "विज्ञानम्" भवति। जीवनस्य प्रत्येकं पक्षं विज्ञानं प्रभावयति। वर्त्तमानयुगो विज्ञानस्य युगो गण्यते। "विशिष्टं ज्ञानं विज्ञानम्" इत्युच्यते। अस्माकं प्राचीने साहित्ये विज्ञानशब्दः आत्मज्ञानाय प्रयुक्तः दृश्यते, किन्तु अद्यत्वे शब्दोऽयं विशेषाभिप्रायम् अभिव्यनक्ति। अस्य शब्दस्य अभिप्रायोऽयम् इदानीं कस्यापि पदार्थस्य सर्वेषां सूक्ष्मतमानामपि गुणानां सम्यक्तया परीक्षणं कृत्वा तेषां उपयोगः मानवहितार्थं करणमेव "विज्ञानम्" भवति। वैज्ञानिके युगेऽस्मिन् विज्ञानस्य महत्ता सर्वैः जनैः विदिता अस्ति। यतोहि सम्प्रति सर्वेषु अपि क्षेत्रेषु विज्ञानस्य साम्म्राज्यं दृश्यते। आर्थिकम्, सामाजिकम्, राष्ट्रियम्, अन्ताराष्ट्रियं च सर्वमेव एतत् प्रभावयति। द्युलोके, भूलोके, पाताले, समुद्रे, स्थले, पर्वते, भूगर्भे च सर्वत्रैव विज्ञानस्य गतिः अस्ति। विज्ञानं सततम् अनुसन्धानेन प्रत्यहं नूतनानम् आविष्काराणां प्रभावेण मानवस्य सुख-सुविधां च प्रवर्धयति। सुविशालानि यन्त्रालयाः यन्त्राणां, इलेक्ट्रोनिक-सूक्ष्म-उपकरणानां च प्रयोगेण मानवसेवायां अहर्निशं प्रयत्नशीलानि। मानवः अनेन विना नैव किमपि कार्यं साधयितुं समर्थः अस्ति। किमधिकं सः खलु अद्य विज्ञानस्य दासत्वमेव प्राप्तमिति प्रतीयते।

**विज्ञानस्य महत्त्वम् -**

विज्ञानस्य अस्य साम्राज्यविस्तरणे वस्तुतः वैज्ञानिकानां महत्त्वपूर्णं योगदानम् अस्ति। विश्वस्य अनेकैः वैज्ञानिकैः अनेकेषाम् आविष्काराणां कृते सर्वस्वम् अर्पितम्। कस्मिंश्चित् काले तु

तेषां सम्पूर्णं जीवनम् एव एकस्य आविष्कारस्य कृते आहुतं भवति।तेषां कल्पनाशक्तिः तर्कशक्तिः विचारशक्तिश्च अतीव तीक्ष्णा भवति। ते स्वजीवनस्य प्रतिक्षणस्य उपयोगं कुर्वन्ति। अहर्निशं ते एकस्मिन् एव आविष्कारे दत्तचित्तेन समर्पणभावनया कार्यं कुर्वन्ति, तदैव ते आविष्कारं कमपि कर्त्तुं सक्षमाः भवन्ति। अस्मिन् युगे विज्ञानेन विना शयनभक्षणभ्रमणनर्त्तनप्रेषणश्रवणगमनादिकार्याणि अस्वाभाविकानि प्रतीयन्ते। मानवैः विज्ञानस्य साहाय्येन प्रकृतेर्गहनान्दनतमानि रहस्यानि प्रकाश्यतां नीतानि। वैज्ञानिकाः आविष्काराः एषां प्राणिनां कृते दैनिकजीवनोपयोगिवस्तूनां निर्माणेन सततं मानवसभ्यता संस्कृत्योश्च वर्धनं कुर्वन्ति। विज्ञानस्य प्रभावेण सूर्यचन्द्रादिग्रहाः वायुवर्षादिप्राकृतिक शक्तयश्च अधुना केवलं देवरूपाः न सन्ति, अपितु एते मानवानां साहाय्यकारकाः भवितुम् अर्हन्ति। सूर्याद् एव शक्तिं गृहीत्त्वा नैकानि नवाविष्कारितानि यन्त्राणि चालयितुं शक्यते। सूर्य-ऊर्जया दूरदर्शनसंगणकादियन्त्राणां सञ्चालनं भवत्त्येव साम्प्रतिके काले। अद्यतने युगे एवम् अन्यानि अनेकानि कार्याण्यपि विज्ञानस्य साहाय्येन सम्भवन्ति। श्रीकृष्णेन गीतायां ज्ञानस्य महती प्रशंसा कृता, तेन तु ज्ञानं संसारे सर्वाधिकं पवित्रं कथितम् -

**"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते"**

**विज्ञानस्य आविष्कारः -**

यदि वयं विज्ञानस्य आविष्कारविषये विचारयामः तर्हि एकं विज्ञानपुराणमेव विरचितुं शक्यामहे, किन्तु अत्र तेषाम् आविष्काराणां दिग्दर्शनमात्रमेव प्रस्तूयते। मानवो यद्-यद् इच्छति, तद्-तद् विज्ञानेन उपस्थाप्यते। स्थाने-स्थाने, पदे-पदे, ग्रामे-ग्रामे, नगरे-नगरे च सर्वत्र विज्ञानस्य चमत्काराः दरीदृश्यन्ते। अमेरिकारूसादिदेशनिर्मितैः अपोलोपूनादिभिः अन्तरिक्षोपग्रहैस्तु मानवानां कृते असम्भवमपि कार्यं सम्भाव्यं दृश्यते।

**विज्ञानस्य प्रमुखाः लाभाः -**

**"सङ्गणकम्" इत्यस्य आविष्कारः -**

कम्प्यूटरस्य आविष्कारो विज्ञानस्य सर्वोत्त्कृष्टा उपलब्धिः। सङ्गणकं सर्वासु विधासु अपेक्ष्यते। अस्य आविष्कारेण सम्पूर्णे जगति क्रान्तिः खलु विहिता, प्रत्येके क्षेत्रे अस्य प्रयोगः भवति। कम्प्यूटरस्य उपयोग क्षेत्राणि- (१) लेखनकार्यसम्पादने (२) डेटासङ्कलने (३) यन्त्राणां - आकारप्रकारनिर्धारिणे (४) सुन्दरच्छायाचित्रनिर्माणे (५) भवनानां निर्माणप्रक्रियायाम् (६) साफ्टवेयर निर्माणकार्ये (७) रोगाणां सूक्ष्मपरीक्षणे (८) वैज्ञानिक अनुसंधानकार्ये (९) वाणिज्य व्यवसाये (१०) विमानानां दिशा निर्देशने सञ्चालने च (११) शिक्षाक्षेत्रे (१२) ऋतुनिर्देशने (१३) ललितकला-कार्यकलापे (१४) मनोरंजनक्षेत्रे (१५) बीमा शेयर प्रभृतिषु उद्योगेषु (१६) रेलयानदिषु

आरक्षणकार्ये (१७) ग्रहोपग्रहाणां स्थित्त्यादेः आकलनकार्ये (१८) शल्यादिक्रियायां चिकित्साक्षेत्रे (१९) दूरसंचारक्षेत्रे (२०) इन्टरनेट, ईमेल प्रभृतयः प्रयोगे। इत्यादयः संगणकस्य प्रयोगेण नूतनां क्रान्तिं जनयति।

**"यातायातक्षेत्रे" आविष्कारः -**

विद्युत्सहयोगेनैव यातायातक्षेत्रे विज्ञानेन द्रुतगमनशीलं रेलयानं निर्मितम्। एवमेव वायुयानस्य आविष्कारेण आकाशेऽपि गमनं सम्भाव्यं जातम्। जलयानेन च दुस्तरेऽपि सागरे तरितुं समर्थः मानवः अन्यच्च राकेटयानेन तु अस्य मानवस्य अन्येषु ग्रहमण्डलेषु अपि गतिः सञ्जाता। एवमेव साइकिल, मोटरसाइकिल, स्कूटर, बस, ट्रक, कार प्रभृतीनां लघुयानानामाविष्काराद् अल्पदूरीये यातायाते अतिसौकर्यं सञ्जातम्।

**"विद्युत्" आविष्कारः -**

विज्ञानेन मानवः सुख-सुविधा समृध्यर्थं तादृशानि यन्त्राणि निर्मितानि येन ग्रीष्मकालेऽपि शीतलो वायुः शरदि च उष्णो वायुः प्राप्यते। तदर्थं विज्ञानेन वातानुकूलनयन्त्राणि एयरकंडीशनर, कूलर, विद्युत् व्यजनानि च निर्मितानि। एवमेव एक्सरेयन्त्रस्य आविष्कारेण शरीरे स्थितानां गूढरोगाणां अपि सहजतयैव ज्ञानं भवति। अनेनैव यन्त्रेण भूगर्भे स्थितानां पदार्थानामपि ज्ञानं सरलतया जायते। एक्स-रे, कैट, स्कैन, अल्ट्रासाउण्ड प्रभृतीनाम् अपि निदानं ज्ञातमेव। अधुना शल्यक्रियया, अंग-प्रत्यारोपणम्, हृदय-प्रत्यारोपणम्, कृत्रिमांग-रोपणमपि संभाव्यते। जनसंख्या वृद्धि निरसनार्थं निरोधोपाया अपि प्रवर्तिताः।

**"कृषिक्षेत्रे" आविष्कारः -**

कृषिक्षेत्रेऽपि विज्ञानस्य प्रभावः स्पष्टमेव दृश्यते। तत्रापि बहूनि यन्त्राणि आविष्कृतानि विज्ञानेन। तैः यन्त्रैः स्वल्पेनैव कालेन बहूनि असाध्यानि अपि कार्याणि सम्भवन्ति।

**"संचारक्षेत्रे" आविष्कारः -**

संचारक्षेत्रेऽपि विज्ञानस्य चमत्कारो दृश्यते। दूरभाषेण जगति यत्र कुत्रापि स्थितेन परिचितेन संभाषणं कर्त्तुं शक्यते। चलभाषितयन्त्रम् इत्यस्य आविष्कारेण नूतना क्रान्तिः सञ्जाता। यत्र कुत्रापि सन् कुत्रापि स्थितेन वार्त्तालापः कर्त्तुं पार्यते। अंतर्जाल, तार, वायरलेस, टेलीप्रिंटर, टलेक्स प्रभृतिभिः द्रुतं सन्देश प्रेषणं संभवति।

**(च) "परमाणुशक्त्या" आविष्कारः -**

परमाणुशक्त्या अपि आविष्कारः कृतः वैज्ञानिकैः। यद्यपि अस्याः शक्त्याः शान्त्यर्थमेव प्रायः प्रयोगः क्रियते, किन्तु यदि अस्याः शक्त्याः विनाशाय कदापि प्रयोगः भविष्यति, तर्हि मानवतायाः

विनाशः अवश्यं भाव्यः जापानदेशस्य "हिरोशिमा नागासाकी" इति नगरे अस्य उदाहरणे स्तः। अतः अस्माभिः सदैव वैज्ञानिकानां आविष्काराणां प्रयोगः मानवतायाः हिताय एव करणीयः।

**"मुद्रणालयानाम्" आविष्कारः -**

शिक्षाप्रचारक्षेत्रे महत् साहाय्यम् आचरति। विविधवर्णयुक्तानि चित्राणि सद्य एव मुद्रयितुं शक्यन्ते। पुस्तकप्रकाशनव्यवसाये अपूर्वा क्रान्तिः प्रवृत्ता। समाचारपत्राणां माध्यमेन दूरदर्शन प्रभावेण च सर्वोऽपि नूतनो गतिविधिः प्रत्यहं अनायासेन प्राप्यते।

**"मनोरंजनक्षेत्रे" आविष्कारः -**

मनोरंजनसाधनेषु अपि विज्ञानाविष्काराः क्रान्तिम् अजनयन्। सिनेमा-दूरदर्शनादीनाम् आविष्काराः प्रत्यहं प्रतिक्षण वृत्तं बोधयन्ति। रेडियो-वीडियो क्रीडाः मनोरंजनं कुर्वन्ति। छायाचित्र निर्माणार्थं केमरा प्रभृतीनां निर्माणं बालार्थं विविधक्रीडनकानां निर्माणं न कस्य मनो हरति।

**विज्ञानस्य दोषाः -**

विज्ञानस्य यथैव लाभाः तथैव दोषाः अपि सन्ति। यथा विज्ञानेन मानवस्य उपकृतं तथैव अपकृतमपि लक्ष्यते। विज्ञानस्य दुरुपयोगेण बहुविधा दोषाः अपि समुत्पन्नाः अतो विज्ञानम् अभिशापरूपेणापि गृह्यते। विज्ञानस्य प्रभावेण जीवनं धर्महीनं, चरित्रहीनं, स्वास्थ्यहीनं, मनोबलहीनं, कर्मठताविरहितं सालसं च दृश्यते। विज्ञानेन जनाः केवलं घोरभौतिकवादिनः भवन्ति यस्मात् कारणात् तेषां ध्यानं मनागपि आध्यात्मिकविषये नास्ति। "विज्ञानस्य" प्रमुखा दोषाः एवं सन्ति -

(१) विज्ञानेन निर्मितानि युद्धयन्त्राणि मानवानां विनाशकाराणि सन्ति। यदि परमाणुयुद्धं प्रारभ्यते तर्हि विश्वस्य प्रलयमपि निश्चितमस्ति।

(२) विज्ञानस्य प्रभावेण जीवनं धर्महीनं, चरित्रहीनं, स्वास्थ्यहीनं, मनोबलहीनं कर्मठताविरहितं सालसं च दृश्यते।

(३) विज्ञानेन विकास नाम्ना ये महायन्त्रालयाः स्थापिताः ते ध्वनिप्रदूषणम् , जलप्रदूषणम् , वायुप्रदूषणं च विदधति। अतः मानवस्य जीवनं स्वास्थ्यं च संकटापन्नम्।

(४) युद्ध-सामग्री निर्माणे रसायनानाम् अपि प्रयोगो विधीयते। रासायनिक बम-जैविकबम प्रभृतयः क्षणेनैव सर्वं जगद् भस्मसात् कर्त्तुं प्रभवन्ति।

(५) विद्युत् प्रयोगेणापि मृतानां म्रियमाणानां सङ्ख्या वर्धत्येव नित्यम्। विद्युत् शक्त्या अनेकानि ईदृग्विधानि यन्त्राणि चाल्यन्ते यैः मानवानां चतुर्षु दिक्षु वातावरणं दोषयुक्तं भवति। तेन च अनेकाः व्याधयः प्रादुर्भूताः भवन्ति।

साम्प्रतिके काले यादृशी स्थितिः जगति वर्त्तमाना अस्ति तस्यां कस्यापि नरस्य जीवनं विज्ञानं विना चलितुं न शक्नोति। प्राचीनकाले शतयोजनपर्यन्तं मार्गमपि जनाः पदातिरूपेण गन्तुं समर्थाः आसन् परम् अद्यतने कोऽपि जनः पदातिरूपेण अल्पीयसीमपि यात्रां कर्त्तुं न क्षमोऽस्ति। अनेकानि यानानि विज्ञानस्यैव चमत्काराः सन्ति। विज्ञानस्य साहाय्येन एव अस्माकं देशे विविधयन्त्रशालानां निर्माणेन दैनिकोपयोगिवस्तुजातं निर्माय मानवजीवनं सरलतरं क्रियते। साम्प्रतिके युगे मानवैः समाचारपत्र प्रेषणक्षेत्रेऽपि महत् परिवर्त्तनं कृतम्। इदानीं दूरभाषणयन्त्रसाहाय्येन वयं शताधिक्रोशस्थितैः जनैः सह भाषणे साफल्यं प्राप्नुमः। वायरलेसमाध्यमेन वयं कस्यचिदपि सुदूरस्थितस्य एव स्थानस्य भाषणं सन्देषं वा संगीतादिकं च गृहे स्थिताः श्रोतुं समर्थाः स्मः। स्वास्थ्य-चिकित्साक्षेत्रेऽपि विज्ञानस्य विचित्रता दर्शनीया। आधुनिको वैज्ञानिकचिकित्सकः तु कृत्रिमांगप्रत्यारोपणे समर्थः। विज्ञानस्य यथैव लाभाः तथैव दोषाः अपि सन्ति। यथा विज्ञानेन मानवस्य उपकृतं तथैव अपकृतमपि लक्ष्यते। यदि अस्माभिः दोषाणां निराकरणं क्रियते तर्हि विज्ञानं "वरदानरूपम्" भविष्यति। अन्यथा "अभिशापरूपम्" भविता।

**********

## शिक्षायाः स्वरूपम्

कृपामयीविश्वालः
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 852

**शिक्षा**

शिक्षा इत्यस्य शब्दस्यार्थः भवति अन्तःकरणात् बहिरानयनम् इति । अर्थात् आन्तरिकशक्तीनां बहिरायनमेव भवति शिक्षा । व्यापकार्थे या आजीवनं प्रचलति सा शिक्षा इत्यभिधीयते । शिक्षा जन्मतः मृत्युपर्यन्तं प्रतिक्षणं प्रतिपदश्च मानवान् शिक्षयति । मानवः स्वजीवने यत्र कुत्रापि येन केन प्रकारेण यत् किमपि वा अनुभवति, सर्वं शिक्षया एव सिद्धं भवति ।

**शिक्षायाः परिभाषा**

- VIVEKANANDA - मानवान्तर्निहितपूर्णतायाः अभिव्यक्तिः एव शिक्षा ।
- FROBEL - शिक्षा नाम एषा प्रक्रिया वर्तते, यया बालकः जन्मजातशक्तीनां बहिः प्रकटनं कर्त्तुं शक्नुयात् ।

- MAHATMA GANDHI - बालके मनुष्ये च शारीरिक-मानसिक-आध्यात्मिकशक्तीनां उत्तमोत्तमसर्वाङ्गीणविकासः एव शिक्षा ।

**शिक्षायाः उद्देश्यानि**

पारम्परिकधारायाम् आधुनिकधारायां शिक्षायाः विविधानि उद्देश्यानि भवन्ति । यथा-

1. शिक्षायाः पारम्परिकोद्देश्यानि – आध्यात्मिकभावनायाः विकासः
   चारित्रिकविकासः
   ईश्वरभक्तेः धार्मिकभावनायाश्च विकासः
2. शिक्षायाः आधुनिकोद्देश्यानि - व्यक्तित्वस्य विकासः
   सामाजिककुशलतायाः विकासः
   राष्ट्रियभावनायाः विकासः

**संस्कृतक्षेत्रे**

| पारम्परिकशिक्षाधारा | आधुनिकशिक्षाधारा |
|---|---|
| प्रथमा | उच्चप्राथमिकः |
| मध्यमा | माध्यमिकः |
| प्राकशास्त्री | उच्चमाध्यमिकः |
| शास्त्री | स्नातकः |
| आचार्यः | स्नात्तकोत्तरः |

**शिक्षायाः अभिकरणानि**

अभि + करणम् इति शब्दद्वययोजनेन निष्पन्नोऽयं शब्दः। यस्य साहाय्येन सम्पूर्णकार्यस्य सिद्धिः भवति तदेव अभिकरणम् इति। अभिकरणम् इत्यस्य आङ्गलपदं भवति “ AGENCY ” अर्थात् “AN ORGANISATION PROVIDING A PARTICULAR SERVICE” इति । येन माध्यमेन शैक्षिकगतिविधयः प्रचलन्ति तद् माध्यममेव शिक्षायाः साधनम् अभिकरणं वा भवति। शिक्षाक्षेत्रे प्रधानतया त्रिविधानि अभिकरणानि सन्ति। यथा-

I. औपचारिकम् अभिकरणम् (FORMAL AGENCY)
II. अनौपचारिकम् अभिकरणम् (INFORMAL AGENCY)
III. निरौपचारिकम् अभिकरणम् ( NON-FORMAL AGENCY)

**औपचारिकम् अभिकरणम्**

येन माध्यमेन नियमितरुपेण पूर्वयोजनया वा शिक्षाप्रक्रियायाः आयोजनं क्रियते तत् माध्यमेन औपचारिकम् अभिकरणम् भवति। शिक्षायाः औपचारिकाभिकरणानि, यथा-

i. विद्यालयः
ii. महाविद्यालयः
iii. विश्वविद्यालयः
iv. पाठशालाः

**अनौपचारिकम् अभिकरणम्**

औपचारिकातः भिन्ना , औपचारिकसदृशं इदम् अभिकरणम् । छात्राणां नियतोपस्थितिः अत्र न भवति । बोधनं परीक्षास्तु भवन्ति । यथा –

i. मुक्तस्वाध्यायकेन्द्रम्
ii. दूरस्थशिक्षा
iii. पत्राचारपाठ्यक्रमः

**निरौपचारिकम् अभिकरणम्**

येन माध्यमेन औपचारिक - अनौपचारिकयोः अभिकरणयोः यथावश्यकं संमिश्रणेन शिक्षायाः आयोजनं क्रियते तन्माध्यमं भवति निरौपचारिकम् अभिकरणम्। शिक्षायाः निरौपचारिकम् अभिकरणं भवन्ति -

i. ज्ञानसङ्चारसाधनानि
ii. चलच्चित्रगृहम्
iii. मुक्तविश्वविद्यालयः
iv. दूरस्थशिक्षा
v. सङ्गणकयन्त्रम्

**प्रस्तुतलघुशोधप्रवन्धस्य आवश्यकता**

कस्मिन्नपि विषये अनुसन्धानकरणस्य प्राक् तस्य विषयस्य आवश्यकतायाः ज्ञानमतीव महत्वपूर्णं वर्तते।

1. दूरस्था तथा नियमितशिक्षा कार्यक्रमे अध्ययनरतच्छात्राणां शैक्षिकोपलब्धेः ज्ञानस्य स्पष्टीकरणम्।

2. पारम्परिकधारायां अध्ययनरतच्छात्राणां दूरस्थायां तथा नियमितशिक्षाक्षेत्रे अध्ययनरतच्छात्राणां शिक्षायाः अधिगमे सम्मुखीनं समस्यानाम् अध्ययनम्।

3. दूरस्थायां तथा नियमितशिक्षायां अध्ययनरताचार्यच्छात्राणां कक्षायाम् अधिगमस्य प्रभावानाम् अध्ययनम्।

4. दूरस्थायां तथा नियमितशिक्षायां अध्ययनरताचार्यच्छात्राणां शिक्षणाधिगमसमये अधिगमे जायमानबाधकानाम् अध्ययनम्।

**समस्याकथनम्**

प्रस्तुतलघुशोधसमस्यायाः शीर्षकमस्ति - पारम्परिकशिक्षाक्षेत्रे दूरस्थनियमित - आचार्यच्छात्राणां शैक्षिकाभिवृत्तेः अध्ययनम् ।

**प्रस्तुतसमस्यायाः उद्देश्यानि-**

1. श्रृङ्गेरीपरिसरस्य दूरस्थायां तथा नियमिताचार्यच्छात्राणां शिक्षणाधिग्रहणे पारम्परिकधारायाः प्रभावस्य अध्ययनम् ।

2. श्रीसदाशिवपरिसरस्य दूरस्थानां तथा नियमिताचार्यच्छात्राणां शैक्षिकसामञ्जस्यानाम् अध्ययनम् ।

**********

## मनुष्यस्यावयवे ध्वजाद्यष्टौ आयप्रभेदाः

गुरुनारायण नरसिंह भट्ट
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः – 854

देहो देवालयः प्रोक्तः इति वाक्यानुसारेण इदं शरीरं देवायतनमेव । इदं सम्पूर्णं वास्तुशास्त्रानुसारेण विद्यते इत्येव महत्वपूर्णोऽयं विषयः। वास्तुशास्त्रे ध्वजाद्यष्टौ योनयः निगदिताः। तदनुसारं देहे आयप्रभेदाः तत्फलचिन्तनक्रमः।

**ध्वजो धूमश्च सिंहश्च सारमेयो वृषःखरः।**

**दन्ती काकः क्रमादेते........।** इति।

ऐन्द्रीयदिशि ध्वजयोनिः, आग्नेय्यां धूमयोनिः, याम्यदिशि सिंहयोनिः, नैरृत्यां श्वानयोनिः, वरूणदिशि वृषभयोनिः, वायुदिशि गर्दभयोनिः, उत्तरदिशि गजयोनिः, ऐशान्यदिशि काकयोनिः चेति एवं रीत्या पूर्वादि दिक्षु ध्वजादि योनिस्थितिः वर्तते।

अङ्गेषु योन्यादि विभागः एवं क्रियते।

**मूर्ध्निध्वजो घ्राणपुटे तु धूमश्चास्ये हरिः श्रोत्रदृशोः श्वसंज्ञः ।**

**कण्ठे वृषःपाणियुगे खरश्च गजश्च हृद्यङ्घ्रियुगेथ काकः ।**

शिरसि ध्वजयोनिः, नासिकायां धूमयोनिः, मुखे सिंहयोनिः, श्रोत्रदृषोः श्वानयोनिः, कण्ठे वृषयोनिः, हस्तयोः खरयोनिः, हृदये गजयोनिः, पादयुगे काकयोनिः एवं मानवदेहे योनिसंज्ञाः निगदिताः।

**प्रागादि दिक्षु मूर्धादिष्वङ्गेष्वष्टसु च स्थिताः ।**

**ध्वजाद्यास्तस्थितिस्पर्शफलममप्यथ कथ्यते ।।**

पूर्वाद्यष्टदिक्षु मूर्धाद्यंङ्गेषु ध्वजादि अष्टयोनिस्थावयवान् पृच्छकः संस्पृशति चेत् तस्य किमिति कथ्यते इति इत्थं निर्दिष्टम् -

**केतुस्थो ध्वजसिंहगो वृषगजस्थानानि देहे स्पृशन्**

**सम्प्राप्नोति नरः क्रमेण धनगोयानानि भूषामपि ।**

**सिंहस्थोपि च सिंहगोवृषकरि श्रेष्ठध्वजान् संस्पृशन्**

**आयाति प्रतिपक्षनाशकमलासत्पुत्रबन्धवागमान् ।।**

अत्र पूर्वादिदिक्फलं शुभं ,विदिक्फलं अशुभमिति च ज्ञेयम्। यथा पृच्छकः ध्वजादियोनीनां पूर्वादि दिशि स्थित्वा तत्तद्योन्युक्ताङ्गं स्पृशति चेत् क्रमशः धनलाभः, पशुलाभः, वाहनलाभः, आभूषणादिप्राप्तिः, शत्रुनाशः, धनलाभः, सत्पुत्रलाभः, बन्धुलाभश्च भवति। पुनः विशेषतः सिंहयोनिस्थाने स्थित्वा वृषस्थानं स्पृशति चेत् कमलागमः अर्थात् सम्पत्प्राप्तिः भवति।

पृच्छकः वृषादियोनीनां दिशि स्थित्वा तत्तद्योन्युक्ताङ्गं स्पृशति चेत् क्रमशः वृषभलाभः, वाहनलाभः, विद्यालाभः, बन्धुलाभः, उत्तमगजलाभः, आभरणप्राप्तिः, बन्धुलाभः, सत्पुत्रलाभश्च भवति इति ज्ञेयम् ।

**धूमस्थोऽपि च धूमकुक्कुरखरध्वांक्षप्रदेशान् स्पृशन्**

**मृत्युक्लेशभयव्रतक्षयकुटुम्बध्वंसमप्याप्नुयात् ।**

**श्वारूढः श्वखराभिधान बलिभुग्धूमस्थलानि स्पृशन्**

**व्याधिं पुत्रविनाशमेति विपदं वित्तक्षयं मानवः ।।**

धूमादि योन्युक्तानां अग्न्यादि विदिक्षु स्थितः पृच्छकः देहे धूमाद्यङ्गान् स्पृशति चेत् क्रमशः मरणभयम्, दुःखम्, व्रतनाशः, कुटुम्बनाशः, रोगपीडा, पुत्रनाशः, आपत्प्राप्तिः, द्रव्यनाशश्च भवति इति ज्ञेयम्।

पुनश्च गर्दभादि योन्युक्तानां वाय्वादि दिशि स्थितस्तत्तदङ्गं स्पृशति चेत् क्रमशः विवादः, पशुनाशः, आयुधोपद्रवः, भार्यायाः रोगः, बन्धुपीडा, दन्तनाशः, नीचैः मरणम्, पुत्रापदश्च भवति।

अन्ततः दिग्योनिषु स्थित्वा दिग्योनिकावयवानां स्पर्शेन शुभफलं, विदिग्योन्यां स्थित्वा विदिग्योनिकावयवस्पर्शेन अशुभफलमिति ज्ञेयम्।

एवं पूर्वाद्यष्टदिक्षु स्थित्वा मूर्धाद्यंङ्गेषु स्थितानां ध्वजादियोनिस्थानां देहस्यावयवानां स्पर्शनेन चिन्तनीयानां शुभाशुभफलानां चिन्तनं प्रश्नमार्ग नामके ग्रन्थे विस्तरेण कृतम् । दैवज्ञः एतान् विचारान् सम्यक् विचिन्त्य फलनिर्देशं कुर्यात्।

**********

## राष्ट्रियमानवाधिकारायोगः

मधुस्मिता राउत

शिक्षाशास्त्री द्वितीयवर्षम्

अनुक्रमाङ्कः – 904

प्रत्येकं राष्ट्रस्य औन्नत्यं मानवाधिकारान् एव आश्रयते। अधिकारैः कोऽपि मानवः स्वतन्त्रचिन्तनं कर्तुं शक्नोति। स्वतन्त्रचिन्तनेन मानवहिताय कल्याणकारीयोजनानां निर्माणमपि स्वतन्त्रत्वेन क्रियते। एतेषां मानवाधिकाराणां मानवसमाजे विशेषमहत्त्वमस्त्येवेति अधुना सर्वेऽपि देशाः अङ्गीकुर्वन्ति।

भारतस्य राष्ट्रपतिमहोदयेन 28 सितम्बर 1993 तमे वर्षे मानवाधिकारसंरक्षणाध्यादेशः - 1993 इति अधिघोषितः। तथा च अक्टुबरमासस्य 1993 तमे वर्षे भारतसर्वकारेण राष्ट्रियमानवाधिकारायोगः संगठितः। एतस्यायोगस्य मुख्यालयः सरदारपटेलभवनं नवदेहल्यां वर्तते।

**आयोगस्य संघटनम्**

अस्मिन् आयोगे एकः अध्यक्षः, अन्ये सप्तसंख्यकाः सदस्याः च नियुक्ताः भवन्ति। अध्यक्षपदे उच्चतमन्यायालयस्य मुख्यन्यायाधीशः मुख्यन्यायाधीशचरः वा भवति। उच्चतमन्यायालयस्य न्यायमूर्तिः एकः सदस्यः, तथा च अन्यः एकः सदस्यः उच्चतमन्यायालयस्य मुख्यः न्यायमूर्तिः भवति। द्वौ अन्यौ सदस्यौ च मानवाधिकाराणां विषये व्यावहारिकज्ञानिनौ। त्रयः सदस्याः पदेन भवन्ति। ते निम्नोक्तानाम् आयोगानाम् अध्यक्षाः भवन्ति। यथा-

1. राष्ट्रियाल्पसंख्यकायोगस्य अध्यक्षः।
2. राष्ट्रियानुसूचितजातिजनजात्यायोगस्य अध्यक्षः।
3. राष्ट्रियमहिलायोगस्याध्यक्षा च।

**अध्यक्षस्य सदस्यानाञ्चावधिः**

आयोगस्य अध्यक्षस्य सदस्यानां च पञ्चवर्षात्मककार्यकालः भवति। पञ्चवर्षतः प्राक् यदि तेषां वय: सप्ततिवर्षं पूर्णं भवति चेद् तत् पदं त्यक्तव्यमिति।

**आयोगस्य महासचिवः**

अस्मिन् आयोगे एकः महासचिवः भवति, स च आयोगस्य मुख्यकार्यपालकाधिकारी भवति। महासचिवः आयोगस्य विभिन्नसदस्यानां साहाय्येन सर्वविधकार्याणि सम्पादयति , कार्याणां प्रयोजनमपि विदधाति।

**आयोगस्य कार्याणि -**

1. आयोगः न्यायालयस्य समक्षं मानवाधिकारहननसम्बन्धितकार्ये न्यायलयीयहस्तक्षेपं कर्तुं शक्नोति ।
2. राज्यसर्वकारस्याधीने केषुचित् चिकित्सालयेषु, कारागारेषु, सामाजिकसंस्थासु चापेक्षितपरिवर्तमानयनाय प्रस्तावस्वीकृतिः।
3. संविधानेन प्रणीतनियमानां संरक्षणाय कार्यान्वयनाय उपायप्रदानम्।
4. मानवाधिकाराणामुपभोगे समुपगतानां बाधानां निवाराणाय समुचितोपायानां कार्यान्वयनम्।
5. मानवाधिकारसम्बन्धितानां सन्धीनाम् अन्ताराष्ट्रियविधीनाञ्च अध्ययनम्।

**********

## पाठ्यचर्या

प्रियङ्का सेनापति
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 905

**शाब्दिकार्थः**

Curriculum derived from the Latin word ' Currere ' which means Race course or Run way. पाठ्यचर्या तादृशः शिक्षणकार्यक्रमः समालोचितो भवति यस्याधारेण छात्राः

स्वीयोद्देश्यानि, आदर्शान्, आशाः, अभिलाषारित्यादीन् सम्पादयितुं शक्नुवन्तीति। शिक्षणं नाम अध्ययनाध्यापनप्रक्रियैव। औपचारिक-अनौपचारिक-निरौपचारिकाभिकरणद्वारा प्राप्यमाणा शिक्षैषा त्रिमुखी भवति। यस्यामध्यापकः, छात्रः, पाठ्यचर्या चैतानि त्रीण्यङ्गानि सम्प्रधानानि भवन्ति।

पाठ्यचर्यायाः परिभाषाः -

1. Cunningham - पाठ्यचर्या कलाकारस्य/अध्यापकस्य हस्ते वर्तमानमेकमुपकरणं भवति। सः स्वसामग्रीः अथवा छात्रान् स्वीकृत्य स्वीयोद्देश्यानुगुणं कलाभवने अथवा विद्यालये तं परिवर्तयति इति।
2. माध्यमिकशिक्षायोगः - विद्यालयीय सर्वप्रकारकानुभवाः ये सन्तुलितव्यक्तित्वस्य क्रमिकविकाससम्पादनाय छात्राणां सर्वप्रकारकजीवनानुभवसम्बद्धाः भवन्ति इति।
3. Frobel - मानवप्रजातेः सम्पूर्णज्ञानस्य, अनुभवस्य च सारभूता भवति पाठ्यचर्या इति।
4. M.S.Ansari - पाठ्यचर्यायां विद्यालयीय सर्वप्रकारकानुभवा: अन्तर्भवन्ति। ये अधिगन्तृणां व्यवहारे अभिलषितपरिवर्तनानि आनेतुं शक्नुवन्ति, अर्थात् - कक्षाप्रकोष्ठस्याभ्यन्तरे बाह्ये च क्रियमाणाः सर्वे अनुभवाः अस्याम् अन्तर्गच्छन्ति इति।

पाठ्यचर्या-पाठ्यक्रमयोः भेदः -

**पाठ्यचर्या-**

1. कक्षाप्रकोष्ठस्याभ्यन्तरे बाह्ये च क्रियमाणानां सर्वेषामनुभवानां समष्टिरूपा भवति पाठ्यचर्या।
2. इयं व्यापिका भवति।
3. अनया सर्वाङ्गीणविकासः जायते।
4. इयम् अङ्गीभूता भवति।

**पाठ्यक्रमः -**

1. पाठ्यांशानां समुचितक्रमविन्यास: पाठ्यक्रमेति नाम्ना व्यवह्रियते।
2. अयं सीमितः भवति।
3. कक्षाप्रकोष्टस्याभ्यन्तरेव प्रचलति।
4. अस्मिन् सहगामीक्रियाः नान्तर्भवन्ति।

**********

# देशस्य छात्रेभ्यः राष्ट्रीयप्रतिवेदनम्

जयश्री बेहेरा

शिक्षाशास्त्री द्वितीयवर्षम्

अनुक्रमाङ्कः – 907

भारतस्य भविष्यनिर्मातार: प्रियच्छात्रबान्धवा:! भवतां मङ्लं कामये। सम्प्रति देशे केचन स्वार्थलोलुपाः राजनेतारः देशविरुद्धये छात्रान् शस्त्रं निर्माय विध्वंसादिध्येयेन "नागरिकतासंशोधन" प्रावधानं इति कारणं प्रस्थाप्य एकं गहनं षडयन्त्रम् अकारयन्। छात्राः देशनिर्माणस्य न केवलं महत्वपूर्णशृङ्खलाः अपि तु देशस्य पुरोधनि च सन्ति। छात्रैः सह क्रियमाणं स्वस्वार्थसाधनोपायमिदं षडयन्त्रं शनैः शनैः सुस्पष्टं भवति।

भारतं युष्माकं जन्मभूमिः। छात्रधर्मस्तु केवलं राष्ट्रनिर्माणाय अध्ययनम्, स्वकीयजननिजनकयोः अभिलाषापूर्तिः च, तदतिरिच्य न कोऽपि। कथं यूयं राजनैतिकदलानां राष्ट्रद्वेषात्मकाभियानस्य शस्त्रं भूत्वा स्वकीयभविष्येन सह धूतं कुरुथ ? कथम् ?

प्रियच्छात्रबान्धवा:! "जननी जन्मभूमिश्च स्वर्गादपि गरीयसि" इति स्मृत्वा भारतमातुः सुसन्तति इव आचरेयुः। सतर्कः भव। कोऽपि किङ्करः युष्मान् मिथ्याप्रलोभनेन राष्ट्रप्रोहार्थे सज्जः कर्तुं सफलः मा भवेत्, येन युष्माकं छात्रजीवनं कलुषितं न भविष्यति।

भारतस्य गौरवान्विते इतिहासे छात्रवर्गः राष्ट्रद्वेषेन कुकृत्येन देशविरुद्धेः अङ्कितं मा भवेत्, एतदर्थं सतर्कः भव।

राजनैतिकदलानि क्षणभङ्गुराणि, परन्तु अस्माकं देशः तु अद्यापि वर्तते। सोऽपि विधास्यति। भारतीयराजनीतेः स्तरः चिन्तनञ्च गर्ते पतितम् इव प्रतीयते। राजनीतेः अधः पतनं यदि स्वोपक्रमे सफलः स्यात् तर्हि स्वकीयदुष्कृत्येः युष्माकं मस्तके दोषारोपणं करिष्यति। अतः छात्राः! यूयं सज्जाः सतर्काश्च भवथ।

देशस्य सम्पत्तिः युष्माकं राष्ट्रीयसम्पत्तिः अस्ति। अतः स्वकीयराष्ट्रसम्पत्तेः हानिः कीदृशः राष्ट्रधर्मः?

**********

# साक्षरतायाः महत्त्वम्

शुभश्री महाराणा

शिक्षाशास्त्री द्वितीयवर्षम्

अनुक्रमाङ्कः – 908

आधुनिककालेऽस्मिन् शिक्षायाः अत्यन्तं महत्त्वपूर्णस्थानं वर्तते। प्रजातंत्रात्मकं भारतम्। प्रजातन्त्रेऽस्मिन् शिक्षायाः साक्षारतायाश्च विशिष्टमहत्त्वमस्ति। जनसंख्यादृष्ट्या अस्माकं देशः विश्वे द्वितीयस्थाने वर्तते। परन्तु शिक्षादृष्ट्या एतस्य स्थितिः अत्यन्तं चिन्तनीया वर्तते। अत्र साक्षरतायाः प्रतिशतम् अत्यल्पं वर्तते। भारतवर्षस्य अशीतिः प्रतिशतं जनाः ग्रामे निवसन्ति, येषु अनेके निरक्षराः सन्ति। साक्षरतायाः नाम्नि ते अक्षरज्ञानमपि न जानान्ति। ते स्वनाम लेखितुमपि समर्थाः न भवन्ति।

राज्ये सर्वकारः अस्तानां दिशि जागरूकतां प्रदर्शयति। एतन्निमितं सर्वकारीयव्ययविवरणे धनस्य व्यवस्था अपि सर्वकारेण क्रियमाणा वर्तते। किन्तु अपेक्षितपरिणामः नावलोक्यते। न केवलं केन्द्रसर्वकारः अपितु राज्यसर्वकाराः अपि अस्मिन् विषये प्रयासरताः सन्ति। शिक्षकाः नवयुवकाश्च साक्षरतायाः कृते प्रयत्नं कुर्वन्तः सन्ति। परन्तु वस्तुस्थितिरियं वर्तते यत् केवलं पत्रेषु जनाः साक्षराः वर्तन्ते , वास्तवतया ध्वस्तव्ययानुगुणं परिणामः न तथा दृश्यते। ध्वस्तापव्ययः अधिकः जायमानः वर्तते। घोषणानुसारं साक्षराः कुत्रापि न दृश्यन्ते। इदमपि सत्यं वर्तते यत् -ग्रामेषु जनाः जागरुकाः न वर्तन्ते, ते शिक्षायाः महत्वं न अवगच्छन्ति। येषु जनेषु जागृतिः भवेत् ते शिक्षायाः साक्षरतायाश्च महत्त्वमवगच्छेयुः। महत्त्वं विज्ञाय पठनार्थं स्वयमेव अग्रे आगच्छेयुः, तथा पूर्णसाक्षरतां सम्पादयन्तु।

**********

# यावज्जीवेत्सुखंजीवेत्

मधुस्मितामिश्रः

शिक्षाशास्त्री द्वितीयवर्षम्

अनुक्रमाङ्कः – 909

चार्वाकाणां चत्वारः सम्प्रदायाः सन्ति। तत्र देहात्मवादिनः चार्वाकाः सर्वप्रधानाः सन्ति। एते चार्वाकाः शरीरस्यैवात्मत्वं स्वीकुर्वन्ति। छान्दोग्योपनिषदः अष्टमाध्याये चार्वाकदर्शनस्य बीजानि सुरक्षितानि सन्ति । बृहस्पतिरेव चार्वाकदर्शनस्य सर्वप्रथमः प्रचारकः आसीत्।

देहात्मवादिनः चार्वाकाः प्रलये न हि विश्वसन्ति। एतेषां मतानुसारं सृष्टिः स्वयमेव भवति अथवा मातृपित्रोः परम्परया भवति। एते प्रतिपादयन्ति यत् - येन प्रकारेण वर्षाकाले

पृथिव्यादिभूतेभ्यः सहसा कीटाः समुत्पद्यन्ते तथैव मनुष्यादि जीवेभ्यः तेषां चैतन्यं निष्कारणमेवोत्पद्यते। इमे चार्वाकाः आत्मव्यतिरिक्तं परमात्मानं न स्वीकुर्वन्ति। यतोहि तेषां मतानुसारं परलोकः अपि कश्चन नास्ति, मरणानन्तरं जीवस्य अस्तित्वमपि नास्ति। शरीरमेव जीवस्य सत्ता। शरीरविनाशसमकालमेव जीवस्यविनाशो भवति। अतः एते वदन्ति-

**"यावज्जीवेत्सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्।**

**भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।"**

**********

## काव्यप्रयोजनम्

सुमित्रा साहु

शिक्षाशास्त्री द्वितीयवर्षम्

अनुक्रमाङ्कः – 910

इह संसारे नैवम्भूतः कश्चन जनः वर्तते यः प्रयोजनमन्तरा कर्मणि प्रवृत्तः भवति। अत उक्तम्- **"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते"**। अत्र विचारयामः काव्यस्य किं तावत् प्रयोजनम्? मम्मटानुसारम् -

**काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परनिर्वृत्तये कान्तासम्मिततया उपदेशयुजे।।**

अर्थात् - काव्यं यशनिमित्तम्, अर्थागमनाय,व्यवहारज्ञानाय, अमङ्गलविनाशाय, श्रवणमात्रेणापारानन्दाय तथा कान्तासम्मितोपदेशद्वारेण सदुपदेशप्रदानाय अलं भवति। एतदपि सिषाधयिषुः ग्रन्थकारः आदौ यशः प्रतिपादयति।

**यशसे-** सर्वजनमनोरञ्जकं काव्यं विरचय्य प्राप्नुवन्ति कवयः विमलं यशम्, कविसंसारे सर्वजनविदितस्य कालिदासस्य तथा तदनन्तरं सम्भूतानां दण्डिभारविमाघादीनां काव्यानि भृशं पठित्वा पाठकाः समर्थयन्ति प्रशंसाम्।

**अर्थकृते-** न केवलमिदं यशः अपि तु काव्यनिर्माणेन काव्यकर्त्तारः लभन्ते अर्थमजस्रम् । प्रवादो वर्तते पुरा धावकः नाम महाकविः रत्नावलीनाटिकां श्रीहर्षनाम्ना विलिख्य लेभे बहूनि धनानि। भारविरपि **"सहसा विदधीत न क्रियाम्"** इति, माघः अपि **"कुमुदवनमपश्री"** इति विलिख्य बह्वर्थराशिं प्राप्तवान्। अधुना अपि साहित्यिकाः ग्रन्थान् विलिख्य साहित्यएकेडमीपक्षतः तथा राष्ट्रपतिसकाशात् आसादयन्ति, अर्थेन साकं प्रशंसायाम्।अतः काव्यम् अर्थगमनाय।

**व्यवहारविदे-** व्यवहारस्य वित् तस्मै व्यवहारविदे। राज्ञि कथं व्यवहरणीयम्, मुनेः सविधे कथमाचरणीयमिति काव्यनुशीलनेन सम्यक् ज्ञायते। अतः काव्यं व्यवहारज्ञानाय अलं भवति।

**शिवेतरक्षतये-** काव्यद्वारा अमङ्गलस्य विनाशो जायते। एतदपि आलंकारिकः मम्मटः प्रतिपादयति यत्- पुरा मयुरः नाम महाकविरासीत्। सः कुष्ठरोगेण पीडितः आसीत्। गङ्गाकूले सूर्यशतकं रचयित्वा तस्मात् दुःसाध्यरोगान्मुक्तः जातः। तस्मात् कारणात् काव्यं शिवेतरक्षतये इति समीचीनम्।

**सद्यः परनिर्वृत्तये-** यदि केनचित् वृक्षरोपणं क्रियते वा यागादि कार्यं क्रियते तर्हि विलम्बेन तत्फलमासाद्यते । परन्तु काव्यं श्रवणात् परं जनाः सद्यः अपारमानन्दं प्राप्नुवन्ति। काव्यस्य प्रयोजनविषये **"सद्यः परनिर्वृत्तये"** इति मतं सुसङ्गतम्।

**कान्तासम्मिततया उपदेशयुजे-** यथा कान्ता सुमिष्टवचनमुक्त्वा स्वप्रियं स्वाभिमुखं करोति तथा काव्यानि अपि सरसतां प्रतिपाद्य रावणकंसादिवन्नाचरणीयं सर्वदा रामकृष्णादिवत् आचरणीयमिति उपदिशति । अतः काव्यं **"कान्तासम्मिततया उपदेशयुजे"** इति मतं समीचीनम्।

**********

## किं ज्ञानमेव अलम् ?

कार्तिक मिश्रा
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः - 911

सत्यमेव जयते, विद्या ददाति विनयम्, न गणस्याग्रतो गच्छेत्, ऋते ज्ञानान्न मुक्तिः इत्येतादृशानि शास्त्रवाक्यानि बहुत्र सभासु कक्ष्यासु वा नैकानाम् अध्यापकानाम्, प्राज्ञानाम्, उच्चस्तरारूढव्यक्तिविशेषाणाम्, मार्गदर्शकाणाम् आस्यात् असकृत् शृण्मः वयम्। किन्तु तान् विदुषः श्रावं श्रावमपि जीवने कदापि किञ्चिदपि परिवर्तनं न समायातम्। तथैव तेषु श्रद्धाभावना विश्वासो वा न समुत्पन्नः। अथ च कश्चन सामान्यः जनः न किमपि वदति, न बोधयति, न च करोति भाषणम्। परं तं दृष्ट्वा जीवने महत्परिवर्तनं सञ्जातमस्ति पुनश्च तस्मिन् अतीवश्रद्धाविश्वासौ विद्येते। तर्हि किमर्थमयं विचित्रो भेदः ?

प्रियपठितारः ! भेदः सुस्पष्टः उद्घाटितश्चैव वर्तते यद् वयं जीवने विविधशास्त्राणां लौकिकविषयाणां स्फिरं ज्ञानं सम्पादयामश्चेदपि यदि आचारे तस्य ज्ञानस्य अनुसरणं न क्रियते

आहोस्वित् आचारे तस्य ज्ञानस्य प्रभावः न दृश्यते तर्हि यद्यपि जनाः उत छात्राः अस्माकं सम्मुखे सम्मानं श्रद्धां च प्रदर्शयिष्यन्ति किन्तु वस्तुतः तेषां मनसि अस्मभ्यं किञ्चिदपि स्थानं न भविष्यति । अथ च ईदृशम् आडम्बरावच्छिन्नसम्मानं विनाशाय एवास्माकम् ।

परन्नो मनस्येकं वचस्येकम् आचरणमपि ज्ञानानुरूपं भवति चेत् सर्वे अस्माकं प्रत्येकं वचसि श्रद्धाविश्वासौ स्थापयिष्यन्ति । तथैव वयमपि सर्वान् अदभ्रोत्तमरीत्या बोधयितुं प्रभविष्यामः । अतः वास्तविकरूपेण यदि कश्चिद् अध्यापकः कस्यचिद् जनस्य मनसि गुरोः पदमलङ्करोति चेत् सः अध्यापकः न तु केवलं विपुलपाण्डित्येन अपितु स्वीयाचरणेन तत्स्थानभाजो भवति ।

**********

## मानवस्य श्रेष्ठधर्मः

करिस्मा बेहेरा
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 919

**"नरत्वं दुर्लभं लोके"**, मनुष्यः इतरप्राणिभ्यः भिन्नः श्रेष्ठतमो जीवश्च। मनुष्यः स्वकीयां बुद्धिं लक्ष्यसाधनाय व्यवहरति। संसारेऽस्मिन् कोऽपि लक्ष्यहीनः भवितुं नेच्छति। परन्तु लक्ष्यसाधनाय बहुनि विघ्नानि जायन्ते। मानवस्तु विघ्नानि अतिक्रम्य लक्ष्यस्थलम् अधिगन्तुम् इच्छति। विभिन्नानां मनुष्याणां जीवनस्य लक्ष्यमपि विविधतया भवति। केषाञ्चित् जीवनस्य लक्ष्यम् ईश्वरप्राप्तिः, केषाञ्चित् जीवन्मुक्तिः, केषाञ्चित् जनसेवा परोपकारो वा भवति। यथा-

**न त्वहं कामये राज्यं, न सुखं न पुनर्भवम्।**
**कामये दुःखतप्तानां, प्राणिनामार्त्ति नाशनम्।।**

एतदपि साधु वर्तते। अस्माकं भारतवर्षे बहवः मनुष्यास्सन्ति, ये च परोपकारं जनसेवां वा स्वजीवनस्य मुख्यलक्ष्यरुपेण स्वीकृतवन्तः। एतेषु जनेषु राजाराममोहनरायः, महात्मगान्धिः निःस्वार्थपराः जनाः आसन् । शिक्षास्वास्थ्यकृषिमाध्यमेन अपि जनसेवा क्रियते। परन्तु तत्र आन्तरिकप्रयोजनं वर्तते। या सेवा कायामनवाक्येन च क्रियते सा एव सेवा पदवाच्या भवति। नोचेत् सेवा निःष्फला भवति।

**1• शिक्षकः -** शिक्षकः शिक्षां ददाति। अज्ञानिभ्यः ज्ञानं वितरति। छात्राणां भविष्यं निर्माति।

**2• चिकित्सकः -** चिकित्सकः अपि व्याधिभिः आतुराणां जनानां सेवां करोति। व्याधितः विमुक्तं कृत्वा आनन्देन कालं यापयितुं प्रेरयति च।

**3• कृषकः -** कृषकः अपि जनसेवां करोति, परिश्रमं कृत्वा शस्यमुत्पाद्य क्षुधीतानां जनानां मुखे अन्नं ददाति। देशस्य खाद्यस्य आवश्यकतां संपूरयति।

**4• नेता -** देशभक्तनेतारः अपि देशस्य सेवकाः भवन्ति। तेऽपि यथाशक्ति जनानां सेवां कुर्वन्ति।

**5• सैनिकः -** सैनिकाः तु स्वप्राणविनिमयेन देशं रक्षन्ति। देशस्य धनजीवनस्य सुरक्षा तेषामुपरि एव न्यस्ता भवति।

इत्थं समाजस्य विविधजनाः विविधोपायेन जनसेवां देशसेवां च कुर्वन्ति। एतेषु कायमनोवाक्यैः संपादिता सेवा यथार्थसेवा भवति। अनेन मानवसेवा प्रकृष्टः धर्मः। कथ्यते - " **दरिद्रनारायणां सेवा एव ईश्वरसेवा",** तपयज्ञादिभिः यत् कर्मं क्रियते, यश्च धर्मः लभ्यते, तत्तु स्वार्थाय भवति। परं दरिद्रजनानां या सेवा क्रियते, सा तु प्रकृष्टमानवसेवा भवति। एतदर्थं मदरटेरेसा विदेशिनी भूत्वा अपि भारतवर्षस्य दरिद्रजनानां सेवां कृत्वा स्वपराकाष्ठां प्रदर्शितवती।

अत एव परोपकाराय यत् क्रियते स एव यथार्थतया धर्मो भवति। परोपकारः सर्वेषां जनानां लक्ष्यं स्यात् । साधूच्यते **"परोपकाराय स्वर्गाय"** एतदर्थमेव सज्जनाः स्वजीवनस्य सकलं समयं परोपकाराय नियोजयन्ति। न तु स्वार्थाय। यस्य या शक्तिः भवति, सा शक्तिः परोपकाराय स्यात्। कथ्यते –

**"शक्तिः परेषां परिरक्षणाय", "परोपकाराय सतां विभूतयः"** । पुनश्च कथ्यते - **धनानि जीवितं चैव परार्थे प्राज्ञं उत्सृजयेत्** ।

अत एव सर्वथा परोपकारः जीवनस्य लक्ष्यं स्यात्।

**********

## छात्राणामध्ययनं तपः

रञ्जुला पधान

शिक्षाशास्त्री द्वितीयवर्षम्

अनुक्रमाङ्कः - 918

भारतवर्षे वर्णानाम् आश्रमाणाञ्च माहात्म्यं वर्त्तते। सर्वाणि शास्त्राणि वर्णाश्रमाणां माहात्म्यं स्वीकुर्वन्ति। मनुस्मृतौ समाज-ब्राह्मण-क्षत्रिय-वैश्य-शूद्राख्येषु वर्णविभागेषु जीवनं च ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ- सन्यासाख्येषु आश्रमेषु विभक्तः। तत्र ब्रह्मचर्याश्रमः जीवनस्तरे प्रथमे चरणे वर्तते। अस्याम् अवस्थायां जीवनम् उन्नत्युन्मुखं भवति। शरीरस्य सर्वे अवयवाः वर्द्धन्ते। बुद्धिरतीव

स्वस्था भवति। अत एव अस्यामवस्थायां वालकस्य अभिभावकै: नूनं सावधानै: भवितव्य: येन बालस्य कुपथि प्रवृत्ति: माभूत् । इयमेवावस्था वर्तते यस्यां बाल: अध्ययनं करोति। अत एव भारतीयैर्मनीषिभि: एका व्यवस्था संपादिता सा तु अध्ययनाध्यापनर्योविंधि:। अस्मिन् प्रसङ्गे वेदस्य वचनम् स्मरणीयम्। यथा -

"अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत्।"

प्राचीने भारते सर्वेषां ब्रह्मचारिणां गुरोर्गृहे निवासस्य व्यवस्था आसीत्। अस्मिन् प्रसङ्गे मनुना उक्तम् -

"चर्तुथमायुषो भागमुषित्वाद्यं गुरौ द्विज:

द्वितीयमायुषोभागं कृतदारो गृहे वसेत्।।"

वेदा अपि ब्रह्मचर्यावस्थायां अध्ययनस्य आवश्यकताविषये मतमुपस्थापयन्ति। यथा -

"स्वाध्यायोऽधेतव्य:"

भगवान् श्रीकृष्ण: अध्ययनस्य तपस्वरुपतां प्रतिपादयन् अस्ति -

"स्वाध्यायमभ्यसनं चैव वाङ्मयं तप उच्यते।"

वेदेषु उक्तमस्ति यत् -

"स्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम्।"

मनुना अपि उक्तं यत् वेदानामभ्यसनमेव द्विजानां परमं कर्त्तव्यम्। यथा -

"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय:।।"

एतेन विवेचनेन ज्ञायते यत् छात्रावस्थायां अध्ययनमेव परमं तप:। तपो हि नाम बाह्याभ्यन्तराणि सर्वाणि इन्द्रियाणि संयम्य स्वलक्ष्यप्राप्तये कृतमनुष्ठानमेव। अनेन अध्ययनेन लक्ष्यभूतस्य ज्ञानस्य प्राप्तिर्भवति। अस्य अध्ययनस्य आजीवनं आवश्यकता वर्तते। अध्ययनपराङ्मुखानां विदुषां शास्त्राणि शनै: शनै: विस्मृतिं यान्ति। अत एव अध्ययनशीलानामेव सर्वत्र सम्मानं भवति। एतै: अध्ययनशीलै: विद्वद्भि: देश: समुन्नतिं याति। मनुना उक्तम् -

"एतत्देशप्रसूतस्य सकाशादग्रजन्मन:

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा:।।"

विश्वामित्र-वशिष्ठ-याज्ञवल्क्य-वामदेव-प्रभृतिभि: दृष्टानां वेदमन्त्राणां महत्वं वैदेशिका: अपि स्वीकुर्वन्ति। अध्ययनादेव एषां महर्षीणां वाल्मीकि-व्यास-पाणिनि -कात्यायन-पतञ्जलि-कालिदास-भारवि-माघ-वाणभट्टप्रभृतीनां विदुषां गौरवं विश्वेऽस्मिन् विख्यातमस्ति ।

**********

# छात्रः राजनीतिश्च

अशोकडंगवाल:
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्क: - 920

छात्रजीवनं मानवजीवनस्य सर्वाधिक: महत्वपूर्णो कालोऽस्ति। कालेऽस्मिन् छात्र: यान् विषयानधीते उत यानि नैतिकमूल्यानि स आत्मसात् करोति तान्येव जीवनमूल्यानि तस्य भावीजीवनं निर्धारयन्ति। पुस्तकाध्ययनेन स: ज्ञानमवाप्नोति, परन्तु एतदतिरिच्य बहूनि बाह्यकारकाणि तस्य जीवनचक्रं प्रभावयन्ति। विभिन्नप्रकारेण आर्थिका:, राजनैतिका:, धार्मिकाश्च परिवेशा: तस्य जीवनं प्रत्यक्षाप्रत्यक्षरूपेण प्रभावयन्ति। छात्रजीवने पदे-पदे अवाप्ता: अनुभवारेव तस्य व्यक्तित्वनिर्माणस्य प्रमुखा: हेतव: भवन्ति।

मानव: एक: सामाजिक: प्राणी वर्तते। अत: यत्र स: निवसति, तत्रत्यै: पार्श्विकस्थै: जायमानै: कार्यकलापै: स: स्वं पृथक् स्थापयितुन्न शक्नोति। तस्य राष्ट्रस्य राजनीतिकधार्मिकार्थिकपरिस्थितय: तस्य जीवनं प्रभावयन्ति। सामान्यतया जनानां धारणेयं वर्तते यत् छात्रजीवने राजनीते: समावेश: वर्जित:।

प्राचीनकाले तु विषयोऽयं केवलं राजपरिवारं यावदेवातिष्ठत्। राजनीते: शिक्षा राजपरिवारेभ्यरेव दीयते स्म, परन्तु गच्छता कालेन नियमचक्रेऽस्मिन् परिवर्तनमागतम्। अधुनेयं कस्यचिद् वर्गस्य उत जातिविशेषस्य कृते नास्ति। आधुनिके य: कोऽपि छात्र: , स: कस्यापि वा धर्मस्य सम्प्रदायस्य वा भवत्वमुं विषयं प्रमुखत्वेन अध्येतुं शक्नोति।

स्वतन्त्रताया: परं गतेषु पञ्चदशकेषु देशस्य राजनीते: स्वरूपस्य परिवर्तनं दृष्टम्। साम्प्रतं राजनीतिक्षेत्रं स्वार्थिभि: राजनेतृभि: पूर्णमस्ति। एतादृशा: स्वीयं कार्यम् उत आत्मविषये एव चिन्तयन्ति, न तु राष्ट्रस्य कृते न वा राष्ट्रसम्मानाय। विभिन्नापराधिन: अद्यापि महत्वपूर्णायां पद्याम् अलंकृतास्सन्ति। भारतीयनागरिकास्स्म: इत्यत: अस्माकं दायित्वं वर्तते यत् वयं राष्ट्रस्य राजनीतौ वर्धतापराधं तिष्ठयेम। विद्यार्थिन: यदि राजनीते: मूलसिद्धान्तान् ज्ञास्यन्ति चेद् तदैव एते नागरिककर्तव्यानि ज्ञात्वा सेवां निर्वहिष्यन्ति। महात्मागान्धिन: कुशला: , महन्त: राजनीतिज्ञा: चासन्। यथापि अनेन सह ते स्वामिन: समाजसुधारकाश्चाप्यासन्। साम्प्रतं छात्रै: तेषां जीवनात् प्रेरणा प्राप्तव्या।

राजनीतौ अनपराधिकरणं कर्तुमिदमावश्यकं वर्तते यत् वयं प्राथमिकादारभ्य एव छात्रेभ्य: राजनीतिशिक्षां यच्छेम। शिक्षकाणामिदं दायित्वं वर्तते यत्ते छात्रान् वास्तविकपरिस्थिते: परिचयं

कारयेयु:, येन ते प्रौढा: सम्भूय सदसद् मध्ये परिचयं प्राप्नुयुः। सर्वेषां विद्यार्थिनामिदं कर्तव्यं भवति यत् इमे राष्ट्रहितमेव सर्वोत्कृष्टं चिन्तयेयु:। यतोहि एतै: ह्येवाग्रे राष्ट्रसंरक्षणं कर्तव्यम्। अत: राष्ट्रस्योचितानुचितविषयेषु एतेषामाबाल्यादेव स्पष्टं ज्ञानं भवेत्।

विद्यार्थिजीवनं परमं पवित्रं राजनीतिजीवनमपवित्रञ्च मन्यते यतोहि अध्ययनं सद्मनसा क्रियते परं राजनीतौ तन्न परिदृश्यते। अत: शिक्षणे राजनीतिश्शिक्षा भवेन्न तु छात्रजीवने।

**********

## मे प्रियतमा

श्रीकान्तनायकः
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 921

नामास्ति तस्यास्त्ववाच्यं हि कस्मै,
स्निह्यामि यस्यां सततं सदाहम्।
वर्षस्य योगेऽस्ति नवाधिकस्य,
रात्रे वियोगस्य यया ममास्ति।।१।।

आयाति चिन्ता शयने हि यस्याः,
पाठे तथा जागरणे सदैव।
कक्षे बहिर्वा पठने प्रसङ्गे,
तस्याः कथां केवलमेव वच्मि ।। २।।

एकाकिनः वै पथि गच्छतश्च,
प्रत्येकमङ्गं मम सर्वदैव।
तस्याः गुणं रूपशरीरदिव्यम्,
आरात्रिपर्यन्तमहं स्मरामि।। ३।।

कोणेषु सर्वेषु सदा हि कक्षे,
सर्वेषु कालेषु मनोगता सा।
अन्यत्र सर्वत्र सदैव वै,
रराजते सा हृदि सुप्तदेशे।। ४।।

सा जीवनं मे हि तथैव चान्नम्,
सा प्रेरिका मे सुपथस्य लोके।
सा जीविका मेऽस्ति सदास्ति नम्या,
सर्वस्वमेवास्ति मम प्रिया सा।। ५।।

प्रातर्नम्या पुनर्ध्येया, सदा वन्द्या सदा प्रिया।
मया हि सेवितव्या सा, सा मे संस्कृतपुस्तिका।।
सा मे संस्कृतपुस्तिका...............।।

**********

## सम्प्रेषणम्

संगीत सुना
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्क: - 922

सम्प्रेषणं नाम परस्परसूचनानां विचाराणाम् आदानप्रदानम् । 'सम्प्रेषणम्' इति पदम् आङ्गलभाषायाम् Communication इत्युच्यते । Communise इति पदस्यार्थः Common अर्थात् सामान्यमित्यर्थः । अतः उच्यते सम्प्रेषणमेका तादृशी प्रक्रिया, यत्र व्यक्तिः परस्परं सामान्यावबोधमाध्यमेन आदानप्रदानार्थं प्रयतते । अस्य वाक्यस्य तात्पर्यं वर्तते यत् शिक्षया शिक्षणेन च विना विचाराणां सूचनानां च आदानप्रदानं न सम्भवति ।

**परिभाषा**

केषाञ्चन शिक्षाविदां मतानि परिभाषात्वेनात्र उपस्थाप्यन्ते।

*एण्डरसनमहोदयानुसारम् - "सम्प्रेषणं काचित् गतिशीला प्रक्रिया, यत्र व्यक्तिः चेतनाचेतनावस्थयोः वा अन्येषां विचारान् साङ्केतिकरूपेण उपकरणैः प्रभावयति" इति ।

*एडगर डेले महोदयानुसारम् - "सम्प्रेषणं विचारविनिमयस्य मनोभावविचारान् भावनाञ्च परस्परं ज्ञातुम् अवगन्तुं च काचित् प्रक्रिया" इति।

*लेलेंडे ब्राउनमहोदयानुसारम् - "सम्प्रेषणं तथ्यानां, विचाराणां कार्यपध्दतेः वा अन्तः परिवर्तनं प्रसारणञ्च भवति" इति।

**सम्प्रेषणस्य प्रक्रिया**

छात्रशिक्षकयोर्मध्ये जायमानं सम्प्रेषणम् अन्तःप्रक्रिया इति उच्यते । अस्मिन् सम्प्रेषणे शिक्षकस्य महती भूमिका वर्तते । परन्तु अधिगमदृष्ट्या छात्राणां क्रियाशीलता अत्र महत्वपूर्णा भवति ।

एवं रीत्या सम्प्रेषणे त्रयः घटकाः सम्मिलिताः भवन्ति । तद्यथा -

1) पाठ्यवस्तु

2) शिक्षणविधिः

3) शिक्षणोपकरणानि च ।

पुनः शिक्षणे चतस्रः प्रमुखप्रक्रियाः भवन्ति । तद्यथा-

1) पठनम्

2) लेखनम्

3) भाषणम्

4) श्रवणञ्चेति ।

मौखिकसम्प्रेषणे अन्तर्भवति भाषणश्रवणप्रक्रिया ।

मुद्रितसम्प्रेषणे अन्तर्भवति पठनलेखनप्रक्रिया ।

**सम्प्रेषणस्य प्रकारा:**

सम्प्रेषणस्य प्रकारद्वयं वर्तते । यथा-

1) शाब्दिकसम्प्रेषणम्   2) अशाब्दिकसम्प्रेषणम्

1) शाब्दिकसम्प्रेषणम् - शाब्दिकसम्प्रेषणे सर्वदा भाषायाः प्रयोगः कर्तुं शक्यते । एतत् सम्प्रेषणं मौखिकरूपेण वाचा तथा लिखितरूपेण शब्दैः सङ्केतैः वा स्वविचारान् अन्यस्य पार्श्वे प्रस्तोतुं शक्नोति ।

2) अशाब्दिकसम्प्रेषणम् - अशाब्दिकसम्प्रेषणे भाषायाः प्रयोगः न क्रियते । अत्र वाक्सङ्केतः, चक्षुहस्तपादादिसङ्केतादयः प्रमुखसम्प्रेषणानि भवन्ति ।

**********

## मार्गदर्शकः

रवीश जोशी
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः - 923

इह जगति सर्वेऽपि जन्तवः सुखेन जीवनं यापयितुमिच्छन्ति। तदर्थं यत्नमपि कुर्वन्ति च। तत्र बहुधा यत्ने कृते सत्यपि केचन एव तत्र फलं प्राप्नुवन्ति। किमत्र कारणमिति जिज्ञासायां तेषां मार्गे भिन्नत्वं भवति। मार्गदर्शकेष्वपि तस्मात् इदं वक्तुं शक्यते यत् मार्गानुसारं मार्गदर्शकानुसारञ्च अस्माकं यत्नस्य फलं लभ्यते। तदत्र मार्गदर्शकस्य विषये किञ्चित् विचारयामः।

तर्हि कः भवति मार्गदर्शकः ? कः तस्य गुणविशेषः ? इति बहुधा विचारसारणी चित्तभित्तौ आयाति। "मार्गस्य दर्शकः मार्गदर्शकः"। शिक्षकः निर्देशकः, पथप्रदर्शकः, गुरुः इति बहुधा अस्यैव नामान्तराणि भवन्ति। सर्वेषामपि सर्वदा कार्यकरणावसरे मार्गदर्शकस्य आवश्यकता भवत्येव। गृहादेव यदि वयं चिन्तयामः तर्हि अस्माकं जन्मारभ्य पितरौ अस्मभ्यं दर्शयन्ति मार्गान्। कस्मिन् मार्गे गमनमुचितं कस्मिंश्चानुचितम् इति ते कथयन्ति। किञ्चित् यदि वयं वयसा प्रौढाः भवामः तदा शालायां शिक्षकः मार्गदर्शकः भवति। शिक्षकः सामान्येन सर्वान् मार्गं दर्शयति परन्तु ज्ञानविषये। किन्तु यः अस्माकम् उन्नतौ प्रेयसे श्रेयसे च महान्तं परिश्रमं वहति स्वस्य शिष्यस्य उत्कर्षं दृष्ट्वा स्वयं तुष्यति आत्मनः अपेक्षया शिष्यमुन्नतस्तरे द्रष्टुमिच्छति सः भवति सार्थको मार्गदर्शकः। अपि च निवृत्तिविषये अर्थात् आध्यात्मिकविषयान् यः बोधयति सोऽपि मार्गदर्शकः एव। किन्तु तस्य कृते सद्गुरुः इति नामान्तरेण वयं व्यवहरामः।

न केवलं विद्याविषये यः मार्गं दर्शयति सः मार्गदर्शकः भवति। किन्तु लोके वयं देशान्तरं यदा अटामः तदा अनभिज्ञातस्थलं यः परिचाययति सोऽपि मार्गदर्शकः इति पदेन व्यवह्रियते। अपि च विद्यास्तरे ये विद्यावारिधिः,विशिष्टाचार्यः इत्यादिपदवीः चिकित्सन्ति। तेषामपि कश्चन नाम्ना मार्गदर्शकः भवति। तत्तु नियमानुसारं सर्वेषां भवत्येव। किन्तु मार्गदर्शकशब्दः अस्माकं संस्कृतौ विशालार्थे परिगण्यते। यतोहि मार्गाः बहुविधाः भवन्ति। सन्मार्गाः, विपरीतमार्गाः चेत्यादयः। तत्र यन्मार्गं वयं प्रविशामः। तदनुगुणं तत्रापि पथप्रदर्शकः भवन्ति एव। मार्गदर्शकः यादृशः अस्मभ्यम् उपलभ्यते तदनुगुणमेव कार्येषु फलमपि वयं प्राप्नुमः। मार्गदर्शकः अस्ति इत्यतः किमपि कार्यं सिद्ध्यति एव इति न। "मार्गारब्धाः सर्वयत्नाः फलन्ति" "प्रारब्धमुत्तमजनाः न परित्यजन्ति" इति चास्ति खलु सुन्दरी सूक्तिः। सर्वदा मार्गदर्शकाः लभन्ते इति नास्ति। यदा वयं प्रौढाः भवामः तदा उचितानुचितो विवेकः अस्मासु भवति। तदनुगुणं यः पन्थाः साधुः यश्च असाधुरिति वयं ज्ञातुं

शक्नुमः। तदवसरे आत्मा एव अस्माकं मार्गदर्शकरुपेण भवति। यदि अस्मासु सच्चिन्तनं भवति। श्रूयते खलु सुभाषितम्-

**"गुरवो बहवः सन्ति शिष्यवित्तापहारकाः।**

**गुरवो दुर्लभाः सन्ति शिष्याः चित्तापहारकाः"।।**

तस्मात् सद्गुरुरेव अस्माभिः अनुसर्तव्यः शरणीकरणीयः च। तदैव प्रारब्धे कर्मणि वयं यशस्काः भवामः।

**********

## व्याकरणशास्त्रस्य प्रयोजनम्

तृप्ती साहु
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 926

**महत्वम्**

'व्याकरणं' शब्दस्य व्युत्पत्तिः वि + आ + कृ + ल्युट् प्रत्ययस्य योगेन अभवत् । अर्थात् व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम् । येन शब्दस्य प्रकृतिप्रत्ययविधानं तत् व्याकरणमिति कथ्यते । प्रधानं च षट्स्वङ्गेषु व्याकरणम् । वेदाङ्गानां विषये पाणिनीयशिक्षायां कथ्यते यत् -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोतमुच्यते॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं।**

**तस्मात्साङ्गमधित्यैव ब्रह्मलोके महीयते॥**

**रक्षोहागमलध्वसंदेहाः प्रयोजनम् -**

(1) रक्षा

रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यति। व्याकरणाध्ययनस्य प्रधानलक्ष्यं वेदस्य रक्षा विद्यते। वेदस्योपयोगः यज्ञयागविधानेषु विद्यते। कस्य मन्त्रस्य प्रयोगः कस्मिन् यज्ञे भवेत् इति सैव विद्वान् कथयितुं शक्नोति यः एषु मन्त्रेषु आगतानां पदानां स्वरूपं जानाति। श्रुतेः प्रामाण्यं स्वीकृत्य व्याकरणस्याध्ययनं प्रति द्विजस्य कर्तव्यमस्ति।

(2) ऊहः

न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः निगदिताः 'ऊहः' एतस्यार्थो इति नवीनपदनां कल्पना यज्ञस्यावश्यकतानुसारम् एषां मन्त्राणां शब्दानां विभिन्नविभक्तिषु च विपरिणामः अनिवार्यो भवति। एतत्कार्यं व्याकरणज्ञानाद् एव कर्तुं शक्नोति।

(3) आगमः

"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने कृतो यत्नः फलवान् भवति।

(4) लघुः

"ब्राह्मणेनावश्यं शब्दाः ज्ञेयाः" इति न चान्तरेण व्याकरणं लघुनोपयेन शब्दाः शक्या विज्ञातुम्। लघुतायाः कृते व्याकरणस्य पठनपाठनम् अनिवार्यं भवति। व्याकरणस्य अध्ययनं सकलशास्त्राणां कुञ्चिका वर्तते, यथा सरलतया तेषां रहस्योद्घाटनं भवितुमर्हति।

(5) असंदेहः

याज्ञिकाः पठन्ति – स्थूलस्पृशतिमग्निवारुणिमनड्वाहिमालभेत इति। तस्यां संदेहः – स्थूला चासौ स्पृशति च स्थूलानि वा स्पृशन्ति यस्याः सा स्थूलस्पृशतीति। वैदिकशब्दानां विषये शङ्कायाः निवारणं व्याकरणेनैव कर्तुं शक्यते।

व्याकरणस्य महत्वविषये एका लोकोक्तिः प्रसिध्दा वर्तते -

**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत्च्छकृत्॥**

**********

## वचने का दरिद्रता

भवानी पात्र
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 928

विलक्षणेऽस्मिन् संसारे द्विप्रकारकं वचनं भवति - प्रियमप्रियञ्च । प्रियवचने काचित् अपूर्वाकर्षिका शक्तिः भवति । येन सा मानावानां चित्तम् आकर्षति । प्रियवाक्यस्य भाषणेन सर्वे जनाः संतुष्यन्ति । प्रियवचनेन महद् पुण्यं संजायते, अन्ततः सद्गतिरपि प्राप्यते । प्रियवचनं सर्वान्

जागतिकान् कामान् दोग्धि, असौभाग्यं दूरीकरोति, यशः प्रसारयति, अपूर्ण्यं च विनाशयति । यदि कश्चित् जनः अपराधं कृत्वा प्रिवचनम् उक्त्वा क्षमा याचते, तदा मनुष्याः तं क्षमन्ते । प्रियभाषणेन शत्रवः अपि मित्रायन्ते ।

परन्तु ये जनाः अप्रियवचनानि उच्चारयन्ति, तेभ्यः सर्वे कुप्यन्ति द्रुह्यन्ति च । खड्गेन छिन्नं शरीरस्याङ्गं कालक्रमेण स्वस्थं भवति, परं यदि कश्चित् जनः वीभत्सवचनं प्रयुज्य जनानां मर्मस्थलं विदारयति, तर्हि तत् कदापि न विस्मर्यते । उक्तं च -

**"छिन्नं रोहति खड्गेन शरैर्विद्धंश्च रोहति।**
**वचो दुरुक्तवीभत्सं वाक्क्षतं तु न रोहति।।"**

प्रियभाषणेन जिह्वायाः छेदनं न भवति, न चास्ति तालुपतनादि भयम् । अतः अस्माभिः अप्रियवचनं कदापि न वक्तव्यम्, अपितु प्रियमेव वक्तव्यम् । यतो हि उक्तम् -

**"वचने का दरिद्रता"।**

**********

## आधुनिकेऽस्मिन्काले केन्द्रीयविश्वविद्यालयमाध्यमेन संस्कृतस्य प्रचारः

पुपुनदासः
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 929

**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।**
**वेदतत्वार्थसंजुष्टं लोकाऽऽलोककरं शिवम्।।**

सुविदितमेतत् समेषामपि शेमुषीमतां यत् भारते संस्कृतस्य कियन्महत्वं वरीवृत्यत इति। इदानीं संस्कृताभिवृद्धिः किम्प्रयोजिना ? किन्नाम संस्कृतमिति जिज्ञासितञ्चेत् परिष्कृतं परिशुद्धं, व्याकरणादिदोषरहितं यत् तद् संस्कृतम्। प्राचीनैः ऋषिभिः मुनिभिश्च भाषागत-दोषपरिष्कारेण अपशब्दादिनिवारणेन या परिष्कृता भाषा व्यवहृतिमायाति सैव संस्कृतभाषा इति नाम्ना सम्बोध्यते प्रशस्यते आद्रीयते च। सैव देववाणी, गीर्वाणवाणी, गीर्वाणगीरित्यादिभिर्नामधेयैः व्यवह्रीयते। सेयं भाषा भारतीयानां प्राणरूपिणी आचारविचाप्रवर्तिनी कर्त्तव्याकर्त्तव्यबोधिनी लोकद्वयहितसम्पादिनी च। इदमेवालक्ष्यमाधुनिककवयः विस्तृण्वन्ति -

उच्चाचारं विचारं चरिचरिणचये चारु संचारयन्ति,
सञ्चारोच्चारणं चोच्चमुचितरुचितं चेतसा चेतयन्ति।
सञ्चितं चोरयन्ति चिरपरिचरणा चञ्चुरा चञ्चरीव,
चर्च्यार्चामञ्चचञ्चुः शुचिरुचिमुचिरा सच्चिदानन्दवाणी।।

एवं विद्यमानानां ग्रन्थानां, काव्यानां च संस्कृतस्य चारुत्वमुपवर्णितम् ।

**संस्कृतस्य विपुलं साहित्यम् –**

भारतवर्षस्य समस्तमपि प्राचीनवाङ्मयं संस्कृतभाषामाश्रित्यैवातिष्ठते। निखिलमपि वैदिकवाङ्मयम्, रामायणादिमहाकाव्यानि संस्कृतभाषाश्रितानि एवञ्च हिन्दुजनानां धर्मग्रन्थः आदिपुरुषः वेदोऽपि संस्कृतभाषायामेवास्ति सा च भाषेदानीं लुप्तप्रायेवास्ति। तस्याः प्रचाराय प्रसाराय च महान् परिश्रमः विधेयोऽस्माभिः।

अधुना वर्तमाना संस्कृतस्य स्थितिः दुस्सहा वर्तते। बहवो जनाः नैव जानन्ति संस्कृतं किमिति। तादृशानां ग्रामीणजनानां संस्कृतादज्ञानां कृते संस्कृतं परिज्ञापयितुं केन्दियविश्वविद्यालयरूपोपायः श्रेयस्करोऽस्ति। यतो हि यस्य विद्यालयस्य यावती मान्यताऽस्ति, तया मान्यतया सर्वोऽपि लोकः संस्कृते आकृष्टो भवति।

**केन्द्रीयविश्वविद्यालयमाध्यमेनसंस्कृताभिवृद्धेः उपायाः -**

1. पुरा विविधशास्त्रेषु तलस्पर्शापाण्डित्यं पण्डिताः प्रापुः। इदानीं विद्यमानानां विदुषां संख्या क्षीयमाणा दरीदृश्यते। प्राचीनाध्ययनाध्यापनप्रणाल्याः शैथिल्यमेव अस्य निदानमतः तस्य पुनरुज्जीवनाय केन्द्रीयविश्वविद्यालयस्यापेक्षा अस्त्यैव। इदानीं संस्कृताध्ययनाध्यापनं भागशः संस्कृतेन भागशः प्रादेशिकभाषाभिश्च प्रचलति। परं सर्वेष्वपि विश्वविद्यालयेषु सर्वेष्वपि स्तरेषु संस्कृताध्ययनस्य माध्यमः अनिवार्यतया भवति चेत् संस्कृताभिवृद्धिः भवत्यैव।
2. **केन्द्रीयविश्वविद्यालयमाध्यमेन नवीनशब्दानामाविष्कारः ।**

   अस्मिन्नाधुनिककाले विविधशास्त्रेषु आधुनिकविज्ञाने च विविधाः नूतनाः शब्दाः प्रयुज्यन्ते। तेषां समानार्थकशब्दानामाविष्करणाय भाषाशास्त्रविदां सहाय्येन, केन्द्रीयविश्वविद्यालयकरणेनापि सिद्ध्यति।
3. **केन्द्रीयविश्वविद्यालयस्य माध्यमेषु अधिकाधिकसंस्कृतकार्यक्रमाणां प्रसारः ।**

   इदानीं संस्कृते केचनैव कार्यक्रमाः आकाशवाण्यां दूरदर्शने च प्रसरन्ति। केन्द्रीयविश्वविद्यालयीकरणेन अधिकं प्रसारयन्ति।

4. **केन्द्रीयविश्वविद्यालयेन विज्ञानविषयकग्रन्थानां प्रकाशनव्यवस्था।**

संस्कृतभाषायां न केवलं साहित्यादिग्रन्थाः वरीवृत्यन्ते अपितु ज्योतिषराजनीतिशास्त्रादिविषयकाः अपि आविर्भविष्यन्ति। तेन आङ्ग्ले पाठयतां विज्ञानगणितभौतिकशास्त्रज्ञानां संस्कृते जिज्ञासा बोभूयते। इत्थं संस्कृतप्रचारप्रसाराय माध्यमोऽयं सम्राजते।

5. **केन्द्रीयविश्वविद्यालयेन संस्कृते सांस्कृतिककार्यक्रमाणामायोजनम् ।**

संस्कृताभिवृद्धये संस्कृतगीतकाव्यानां कालिदासादिमहाकवीनां काव्येभ्यः चितानां पद्यानां गायनार्थं विश्वविद्यालयेषु प्रतियोगिताः आयोज्यन्ते चेत्, जनान् आकर्षति तत्सर्वम्, अथ च सर्वकारस्य स्वयंसेवासंस्थानानाञ्च सहयोगेन संस्कृताभिवृद्धये केन्द्रीयविश्वविद्यालयानां निर्माणं सम्भवति येन संस्कृतमुन्नतिपथं नेतुं शक्ष्यामः।

अद्येद्युः अत्याधुनिकयुगे संस्कृतभाषा अनर्घा प्रेष्ठा च वर्तते । भारतस्य भाषैषा सांस्कृतिकः निधिः । विश्वसंस्कृतिपरिज्ञानाय संस्कृतभाषापरिहार्या । संस्कृतभाषाश्रयैव संस्कृतिः सुदूरपूर्ववर्तिषु ब्रह्मदेश-श्याम-राव-समुद्रादिद्वीपेषु प्रचारः भारतीयसंस्कृतेः प्राचीनतमरूपवगमनाय संस्कृतं विहाय नान्याः गतिः। संस्कृतवाङ्मयाश्रयेणैव पाश्चात्यपौरस्त्ययोः संस्कृत्योः समन्वयः सम्पर्कः सङ्गतिः अवगम्यते। एवञ्च संस्कृतावृद्धये केन्द्रीयविश्वविद्यालयस्यापेक्षास्त्यैव इति।

**सुवर्णा सद्वृत्ता विविधललितालङ्कृतिचणा,**
**गुणाढ्या निर्दोषा विबुधनिवधराधितपदा।**
**सुरीतिप्रदयाता भवविभवरूपाश्रितरसाः,**
**सदेयं सर्वाणी जयतु सरवाणीह सततम्।।**

**********

## योगः

प्रकाश चन्द्र मेहेर
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 930

अस्य योगशास्त्रस्य रचयिता महर्षि पतञ्जलिः। अयं पतञ्जलिः जीवः ईश्वरश्चेति तत्वद्वयं स्वीकरोति। “धर्मार्थकाममोक्षाणामारोग्यमूलमुत्तमम्” धर्मस्य अनुष्ठानम्, अर्थोपाजनम्,

दिव्यकामना, शिवसङ्कल्पेनसन्ततिप्राप्तिः एवं मोक्षस्य सिध्दिः इति चतुर्विधपुरुषार्थान् सिध्दीकर्तुं सरलतोभावेन मानवैः भवितव्यम्। चित्तवृत्तिनिरोधः एव योगः। योगेन प्रकृतिपुरुषविवेकः तत्पश्चात्कैवल्यं प्राप्तुं शक्नोति अभ्यासेन वैराग्येन च चित्तवृत्तिनिरोधः भवति । श्रीमद्भगवद्गीतायाम् उक्तञ्च -

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥**
**बुध्दियुक्तो जहातीह उभे सुकृतदुष्कृते।**
**तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।**

पदार्थानुरूपं चित्तविकारो भवति। तेनैव आत्मा तान् बोधयति- योगशास्त्रानुसारम् आत्मा निर्विकारः। सदैव परिवर्तितेषु चित्तवृत्तिषु तस्य प्रतिबिम्बपतनेन परिवर्तनमाभासते। फलतृष्णाशून्येन क्रियमाणः सत्वशुध्दिजा ज्ञानप्राप्तिलक्षणा सिध्दिः तद्विपर्ययया असिद्धिः तयोः सिद्ध्यसिद्ध्योः अपि समः तुल्यः भूत्वा कर्माणि करणीयानि। अभ्यासेन वैराग्येण च चित्तवृत्तिनिरोधो भवितुं शक्यते। इत्थमभ्यासरुपेण यमनियमासनप्राणा यामप्रत्याहारधारणध्यानसमाधिप्रभृतयोऽङ्गानि। तेषामभ्यासेन प्रकृतिपुरुषविवेको भवति। ईश्वरप्रणिधानमपि अभ्यासान्तर्गतम्। अनेनापि चित्तवृत्तिनिरोधः भवितुं शक्यते। अस्माकं जीवने योगस्य महत्त्वपूर्णं स्थानं वर्तते । येन मनुष्यस्य आचारे व्यवहारे च परिवर्तनम् आगच्छति ।

**********

## भारतीयशिक्षाव्यवस्था

बसन्त बाहाला
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः - 931

प्राचीनकाले भारतदेशः 'विश्वगुरु' इति नाम्ना विज्ञायते स्म, परन्तु सम्प्रति भारतस्य कीदृशी स्थितिः वर्तते विषयोऽयं तु निश्चयेन विचारणीयः एव । अस्य कारणं किम् ? अयम् अपि चिन्तनीयः विषयः वर्तते । मम दृष्ट्या अस्य मुख्यं कारणमेकमेवास्ति, तच्च वर्तमानकाले भारतीयशिक्षायाव्यवस्था ।

शिक्षायाः प्रथमरश्मिः भारतवर्षे एव अपतत् इति सर्वे जानन्ति एव । यदा सम्पूर्णसंसारः गहनान्धकारे शयनं करोति स्म। तदा भारतीयाः ज्ञानस्य सागरे निमज्जनं कुर्वन्ति स्म । अस्माकं

देशादेव शिक्षायाः प्रचारः प्रसारश्च सम्यकरूपेण अभवत्। यदा संसारस्य अन्यदेशेषु मानवाः पशुः इव विचरन्ति स्म तदा भारतीयाः शिक्षिता भूत्वा सम्यक्तया जीवनं यापयन्ति स्म । यतोहि तस्मिन् समये भारतस्य शिक्षाव्यवस्था सुदृढा आसीत् । अत एव तस्मिन् काले भारतं विश्वगुरुः इति नाम्ना अपि प्रस्थितः आसीत् ।

कालान्तरे भारतीयशिक्षाव्यवस्थायां परिवर्तनं जातम् । भारतीयशिक्षाव्यवस्थायाः उपरि शनैः शनैः पाश्चात्यशिक्षायाः प्रभावः जातः । तस्याः शिक्षायाः कोऽपि आधारः तु नासीदेव परन्तु तस्याः प्रभावः अस्माकं सुव्यवस्थितशिक्षाव्यवस्थायाः उपरि अपतत् । भारतीयशिक्षायाः आधारः संस्कृतभाषा अस्ति इति तु सर्वे जानन्ति एव । संस्कृता, परिष्कृता, परिमार्जिता, व्याकरणादिदोषरहिता इयं भाषा संस्कृतम्, एतस्याः भाषायाः स्थाने आङ्गलभाषायाः जागरणम् तदानीमभवत् । तस्याः एव पतनं जातमित्युक्ते शिक्षाव्यस्थायाः दशा का भविष्यति ? इत्यस्मिन् विषये भवन्तः एव चिन्तयन्तु । प्राचीनकाले भारतीयजनाः संस्कृतभाषायाः माध्यमेन एव अध्ययनं कुर्वन्ति स। अत एव तस्मिन् काले भारतदेशः विश्वगुरुः आसीत् ।

अधुना भारतीयाः स्वीयसंस्कारान् विस्मृत्य वेगेन पाश्चात्यसंस्कारान् धारयन्ति । तत्रापि मुख्यरुपेण तु युवानः पाश्चात्यसंस्कारान् स्वीकुर्वन्ति । युवानः कस्यापि देशस्य प्रगतेः आधारशिला भवन्ति । यदि ते एव स्वीयसंस्कारान् त्यक्तवा विदेशीयसंस्कारान् अनुसरन्ति चेद् देशस्य स्थितिः कीदृशीस्यादिति चिन्तनीयोऽयं विषयः।

अतः देशस्य पुनः पूर्वस्थितेः प्राप्त्यर्थं किं करणीयम् ? इति प्रश्ने सति, उत्तरम् अस्माकं समक्षे अस्ति यत् -

देशस्य शिक्षाप्रक्रियायां संशोधनं करणीयम् । देशस्य शिक्षाप्रक्रिया ईदृशी भवेत् यया देशस्य सर्वाङ्गीणः सर्वोत्तमश्च विकासः भवेत् । आधुनिकोऽयं युगः पुनः संस्कृतस्य युगः स्यात् । शिक्षायाः प्रत्येकस्मिन् अपि क्षेत्रे संस्कृतभाषा अनिवार्या स्यात्, आधुनिकशिक्षा स्यात् परं तया सह षोडशसंस्कारणाम्, वेदानाम्, धर्मशास्त्राणां ज्ञानमपि सर्वेषां भवेत् । यतः वास्तविकतया अस्माकं सर्वाङ्गीणः सर्वोत्तमश्च विकासः भविष्यति, येन निश्चयेन भारतं पुनः संसारे विश्वगुरुरिति पदं प्राप्तुमर्हति ।

**********

# हितं मनोहारि च दुर्लभं वचः

द्वितीकृष्ण पाणीग्राही
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 935

अस्मिन् प्रपञ्चे मनुष्याणां भावानाम् आदानप्रदानस्य एका प्रक्रिया सर्वथा प्रचलति। भावानाम् आदानप्रदानाय नैकाः मार्गाः भवन्ति तेषु वाणी अपि एकं प्रधानमङ्गं भजते। इयम् एव वाणी मानवं सुशिक्षितं सुप्रतिष्ठितं च सम्पादयति । वाणी एव मनुष्यस्य सर्वविधसमस्यानां समाधाने साहाय्यं करोति इतरसंकटापन्नेषु च रक्षति। उदाहरणार्थं यथा कुरुक्षेत्रे अर्जुनमुद्दिश्य श्रीकृष्णः आदिदेश यत् -

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥**

**(श्रीमद्भगवद्गीता १७/१५)**

अस्यार्थः वर्तते वाक्यम् उद्वेगरहितम्, सत्यम्,हितप्रेमयुक्तञ्च भवति चेद् स्वाध्यायेन अभ्यसनेन च वाणी तपोनिष्ठा, परिष्कृता प्रभावपूर्णा च भवति। एवं रूपेण साधुवाणीं प्रयुज्य श्रीकृष्णेन अर्जुनस्य मोहभङ्गः अपि कृतः।

इत्थमेव मानवाः सम्प्रति समाजे तु परस्परं प्रीतिं सौहार्दं च संस्थाप्य स्वकार्याणि साधयन्ति। वाणी लोकेऽस्मिन् कुत्रचित् स्थलेषु हितसाधिका सत्यपि दुष्प्रवृत्तिमानवानां कृते परिपालनाय कष्टकरा अनुभूयते। उदाहरणतया विभीषणेन रावणस्य हितसाधनाय आदिष्टः वर्तते यत् -

**सुलभाः पुरुषाः राजन् सततं प्रियवादिनः।**
**अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥**

**(रामायणयुद्धकाण्डः १६/२१)**

प्रीतियुक्तं मनोहरसाधकं च वक्षमाणपुरुषाः अनायासेन लभ्यन्ते परन्तु अप्रियसत्यवचनस्य वक्ता श्रोता च कष्टेन एव प्राप्येते किञ्च तद्वचनं श्रवणे यदि कटुः स्याच्चेदपि अप्रत्यक्षरूपेण तद्वचनं हितसाधकमेव भवति।

एवं रूपेण समाजेस्मिन् मानवानां भावानां विनिमयं हितसाधकं मनोहरसाधकञ्च यदि भवति चेत् मानवानां मध्ये सामञ्जस्यबलं दृढतां प्राप्नोति। प्रीत्या वाणी प्रयुज्य परस्परं सम्मिल्य सहकार्यं क्रियते चेत् मानवः आदर्शपूर्णजीवनम् अतिवाहितुमर्हति।

**********

# भारतीयशिक्षादर्शनयोर्सम्बन्धः

गुम्मडिमङ्गतायारु
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 936

शिक्षा एवं दर्शनमिति शब्दौ भिन्नौ चेदपि लक्ष्यार्थः समानः वर्तते। संसारे मानवजीवननिमित्तं शिक्षा एवं दर्शनम् उभयोः आवश्यकता अनिवार्या भवति। पुनः शिक्षा तथा दर्शनस्य लक्ष्यं एकमेव भवति, ज्ञानोपार्जनमेवं मानवानां कृते उभयोः आवश्यकता अस्ति। दर्शनं मानवजीवनस्य लक्ष्यनिर्धारणं करोति। एवं तत्र निर्धारणे शिक्षा एका माध्यमरूपा भवति। पुरातनकालादारभ्य आधुनिकयुगेऽपि शिक्षायाः महत्त्वं सर्वत्र अवलोक्यते। यथा पुरातनकाले व्यक्तित्वनिर्माणे शिक्षा विद्यारूपेण प्रचलिता आसीत्, गुरुकुलेषु मनुष्याः वेदशास्त्रादिनां ज्ञानग्रहणं विधाय तेषां जीवनं सार्थकं विहीतवन्तः। तथैव इदानींतन समाजेऽपि शिक्षायाः आवश्यकता व्यक्तित्वनिर्माणे भवति।

शिक्षा शब्दः शिक्ष् विद्योपादाने इति धातुना निष्पन्नः भवति। दर्शनं दृश् धातोः ल्युट् प्रत्यये सति निष्पन्नं भवति। इतोऽपि दृश्यते ज्ञायते विचार्यते परमतत्वम्, अनेन इति दर्शनम्। दर्शनं नाम तत्वज्ञानम्। एवञ्च दर्शनं प्राचीनकालादारभ्य वर्तमानयुगेऽपि महत् योगदानं ददाति। यथा पुरातनयुगे मनुष्याणां व्यक्तित्वघटने दर्शनशास्त्रादि पठनम् नूनमेव आसीत्। तथैव इदानीमपि दर्शनस्य महत्वं व्यक्तित्वघटने अधिकम् अवलोक्यते। एवं हि द्वयोर्मध्ये नित्यसम्बन्धः भवति।

शिक्षायाः माध्यमेन अधिकाधिकरूपेण ज्ञानप्राप्तिः भवति। एवं शिक्षा तथा भारतीयदर्शनम् अस्माकं जीवनं सञ्चालयितुम् साध्ये भवतः। परस्परसम्बन्धेन मानवजीवनस्य महत्वम् उभाभ्यां साध्यते। एवम् उत्तममार्गेषु च एते अस्मान् नयन्ति। शारीरिकमानसिकविकासार्थं शिक्षादर्शनयोः अध्ययनं सर्वैरपि अवश्यमेव करणीयम्।

**********

# रामायणम्

वेङ्कट्रमण गणपति हेब्बार
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः – 941

**"वाल्मीकेर्मुनिसिंहस्य कविता वनचारिणः।**
**गुणवन् रामकथानकं को न याति परां गतिम्।।"**

इदं वाक्यम् अक्षरशः तथ्यम्। बहुभ्यः बहुधा श्रोतुमपीदं रामायणं न हि कस्यापि सहृदयस्य रसिकस्य मनसि अलम्भावमापादयति। आदिकाव्यत्वेन प्रसिद्धमिदं श्रीमद्वाल्मीकिमहर्षिविरचितं रामायणं न केवलं कालापेक्षया आद्यम्, अपि तु "क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः" इत्युक्ते रमणीयकविशिष्टेषु काव्येषु आद्यं रमणीयतममिति वचनं नूनं विदितवेदनमेव।

"रामायणम्" इति पदञ्च एवं व्याकुर्वन्ति रामः अयनं (प्रतिपाद्यः) यस्य तत् रामायणम् इति एकः रामस्य अयनं रामायणम् इत्युक्ते रामचरितम् इत्यर्थः इत्यपरः। रामः अय्यते ( प्राप्यते) अनेन इति रामायणम् इति कश्चन। परन्तु एषु अर्थेषु रामचरितस्येव प्रतिपादकत्वात् "रामायणम्" इत्यर्थः साधुतमः। अस्य काव्यस्य प्रसिद्धिश्च रामायणम् इत्येव। रामायणपदस्य रामस्य अयनमिति व्युत्पत्ति सिद्धम्। अत्र संज्ञायां णत्वविधानेन रामायणपदस्य संज्ञात्वेऽपि यौगिकार्थः न परित्यक्तुं शक्यः। न हि इदं पदं डित्थादिपदवत् केवलं रूढम्, किन्तु योगरूढम्। एवञ्च अस्य काव्यस्य रामचरितमेव विषयः इति एतन्नाम्ना स्पष्टमवगम्यते।

तमसायाः नद्याः तटे विहरन् व्याधनिहतसहचरशोकसंविग्नहृदयां रुदतीं चक्रवाकीं दर्शं दर्शं महर्षेः वल्मीकेः करुणापरिपूर्णहृदयं कवितारूपेण प्रस्फुटितमासीत्। अनंन्तरं रामायणं विरच्य भगवान् वाल्मीकिः तस्य प्रचारस्य समुचितम् आधिकारिणं चिन्तयन् आसीत्। तदा द्वौ कुमारौ समुपस्थितौ। तच्चिन्ताशमनायैव महर्षिश्चतावेव रामायणप्रचाराय समुचितौ अधिकारिणाविति तदर्थं पर्यगृहीत्। अनन्तरं तयोः चतुर्विंशतिसहस्र (२४,०००) श्लोकयुक्तम् इमम् आदिकाव्यं रामायणं क्रमेण –

बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डम् इति अन्वर्थनामानि सप्तकाण्डानि उपदिदिशुः।

कस्यापि युगस्य साहित्यं तात्कालिकस्य समाजस्य दर्पणो भवति। तत्र राष्ट्रस्य आशानाम् आकाङ्क्षणाञ्च अभिव्यक्तिः भवति। रामायणे वैदिकाः एव विचाराः सविस्तारं व्याख्याताः सन्ति। अपूर्वायां शैल्यां प्राचीनानाम् आर्याणां साहसिकगौरवमयञ्च जीवनम् अनुपमायां सङ्गीतमय्यां

छन्दोबद्धायां संवेदनशीलशैल्यां चित्रयित्वा महाकविः वाल्मीकिः साहित्यं कलायाः भव्ये स्वरूपे ससर्ज। सजीवघटनानां भावनानाञ्च अङ्कनेन महाकविः मानवीयदृष्ट्या तादृशविवेचनाभिः च तत्सृष्टं साहित्यं साधारणजनस्यापि कृते रसस्य आनन्दस्य च स्रोतः स्वरूपं सञ्जातम्। विदुषां समीक्षकाणां रामायणमहाकाव्यविषये इदं समीक्षणं समुचितं यत् 'नास्ति कश्चन पक्षः मानवजीवनस्य यस्य दृश्याङ्कनं' रामायणे न प्राप्यते, नापि वर्तते तथाविधः कश्चन सिद्धान्तः, यस्य आभासः तत्र नोपलभ्यते।

लौकिकपक्षे महाकविः वाल्मीकिः मूलतः स्वकीये महाकाव्ये कलायाः जीवनस्य च सुन्दरतायाः अनुपमं समन्वयं "सत्यं शिवं सुन्दरं" च तत्र साकारञ्चकार। रसपेशलं वर्णनं रामायणस्य हृदयमस्ति। यद्यपि परिवर्तिनं कवीनां काव्यम् अलङ्कारभारनतम् व्यग्रमिव लक्ष्यते किन्तु आदिकवेरस्य काव्यस्तु सहजस्वाभाविकतया भावसौन्दर्यचेतनया च सम्प्रक्तमेव भासते। गुणाः अलङ्काराः ध्वन्यादयश्च यद्यपि भेदोपभेदसहिताः अत्र काव्ये प्राचुर्येण समुपलभ्यन्ते, तथापि प्राधान्यस्तु आत्मभूतस्य रसस्यैव अत्रास्ति। यदि इदमुच्येत यत् महाकाव्यस्य सर्वप्रथमं सर्वगुणसम्पन्नञ्च निदर्शनं वाल्मीकिरामायणमेव अस्ति, तर्हि न स्यात् काऽपि अतिशयोक्तिः।

अत एव भारतीयसाहित्ये समाजे च यः प्रभावः रामायणस्य अङ्गीकृतः नाद्यावधि कस्यचन अन्यस्य काव्यस्य कृते समुपलभ्यते। रामायणोपजीव्यानां नाटकानां, महाकाव्यानां, गीतकाव्यानां चम्पूकाव्यानाञ्च संख्या बहुला अस्ति। भारतीये जनजीवनेऽपि अस्य अविनाशी प्रभावो लक्ष्यते। अस्य देशस्य मनीषा सदा त्यागमेव सर्वातिशयमानवीयगुणं स्वीचक्रे। रामायणे च महोच्छ्रस्य परिवारस्य सैव त्यागकथा वर्णिता अस्ति। पितुः दशरथस्य पुत्रवियोगे प्राणत्यागः सुतस्य रामस्य पितुः दशरथस्य मातुः कैकेयाश्च वचनं पालयतः गृहत्यागः, भार्यायाः सीतायाः अनुजस्य लक्ष्मणस्य च रामस्य कृते ऐश्वर्यत्यागाः भ्रातुः भरतस्य अग्रजस्य रामस्य कृते सर्वविधैश्वर्यसुखत्यागः एते सर्वेऽपि त्यागाः स्नेहेनैव सुखेन विहिताः विद्यन्ते।

रामायणस्य अध्ययनं न केवलं साहित्यिकदृष्ट्या ऐतिहासिकदृष्ट्या वा उपयोगी वर्तते, अपि तु व्यावहारिकदृष्ट्यापि परमोपयोगी वर्तते। इदं हि भारतीयजीवनमूल्यानामाधारशिला वर्तते। गहनजीवनारण्यपथभ्रष्टानां जनानां कृते रामायणस्य श्लोकः वेदवाक्यमिव मार्गदर्शनं करोति। समाजस्य उच्चतमवर्गतः निम्नतमवर्गं यावत् सर्वेषु वर्गेषु रामायणस्य व्यापकः गम्भीरश्च प्रभावः वर्तते। अत्र इदमेव निदर्शनं यत् इदानीन्तनकालेऽपि रामस्य रामायणस्य च अस्तित्वं मन्यमानाः अयोध्यायां राममन्दिरं निर्मातुम् अनुज्ञां ददुः। कापि अन्या साहित्यिकी, धार्मिकी वा कृतिः एतस्य तुलनायां प्रस्तोतुं न शक्यते। रामायणे न केवलम् अस्माकं मानसेषु रमते अपितु सर्वेषां

आकाङ्क्षासु,भावनासु, आचारेषु, व्यवहारेषु च सम्प्रक्तं वरीवर्ति। अनेनैव महाकाव्येन भारतीय मानसेषु रामराज्यस्य स्वर्णमयीपरिकल्पना अङ्किता वर्तते।

इदं खलु जायापत्योः सम्बन्धम्, पितृपुत्रयोः कर्तव्यम्, गुरुशिष्ययोः पारस्परिकव्यवहारम्, भ्रातुः भ्रातरं प्रति कर्तव्यम्, व्यक्तेः समाजं प्रति उत्तरदायित्वम्, आदर्शस्य पितुः मातुः सुतस्य भ्रातुः पतये जायायाश्च चित्रणम्, आदर्शगृहस्य जीवनस्य अभिव्यक्तिरूपं महाकाव्यमस्ति रामायणम्। रामायणं भारतीयसंस्कृतेः आकाशदीपः। इदं न केवलं काव्यं महाकाव्यं वा वर्तते अपि तु इदं हि आर्यजातेः आचारशास्त्रम्, धर्मशास्त्रञ्च वर्तते। इदं खलु मानवजीवनस्य सर्वाङ्गीणआदर्शं प्रस्तौति। रामायणे सभ्यसमाजस्य स्थितिविशेषाः अशनपानादिप्रकाराः, वेषभूषारीतिपरम्पराः मनोरञ्जनप्रकाराणि धर्मस्य दर्शनस्य च विशदं स्वच्छं च वर्णनं सचित्रं समुपलभ्यते। स्वयमेव भगवता रामायणप्रणेतामहर्षिणा स्वकीयं महाकाव्यं 'पुरातनः इतिहासः' इति अभिहितम्।

भारतीयसंस्कृतौ यानि मौलिकानि तत्त्वानि यथोहि आध्यात्मिकता, धर्मपरायणता, कर्मणः फलं, पुनर्जन्म, यमनां नियमानं च परिपालनं, पञ्चमहायज्ञाः, वर्णाश्रमव्यवस्था, विश्वबंधुत्वभावना समन्वयवदिता, पुरुषार्थचतुष्टयम् इत्यादीनि तानि सर्वाण्यपि तत्र रामायणमहाकाव्ये निबिडतया सन्निविष्टानि दृश्यन्ते। रामायणस्य आदर्शश्लिष्टाउक्तयः अस्माकं जनानां जिह्वासु सदैव नरीनृत्यन्ते।

